ॐ तत्सत्।

कामन्दकीयनीतिसारटीका*।

प्रथमः सर्गः।

‘प्रभावात्’ प्रभुशक्तेः। कोशदण्डफलं हि प्रभुशक्तिः। ‘शाश्वते पथि’ स्वर्गमोक्षगामिनि नित्ये मार्गे। दीव्यतीति दिव् क्रीडाविजिगीषा-व्यवहारद्युतिस्तुतिकान्तिगतिष्विति धातूक्तसमस्तगुणसम्पन्नत्वात् ‘देवः’ महीपतिरेव। ‘जयति’ बाह्याभ्यन्तरानरीन् जयतीत्यर्थः। ‘श्रीमान्’ शास्त्रप्रज्ञायात्मसम्पत्तिसम्पन्नः। वधः क्लेशोऽर्थग्रहणञ्च दण्डस्तं दण्डेषु धारयतीति ‘दण्डधारः’॥ १॥

कामन्दकिरधिकृतदेवतास्तुत्यनन्तरं श्लोकपञ्चकेन स्वगुरोरपि नमस्कारं विदधाति। वंशे इति। विशालवंशे भवा विशालवंश्यास्तेषां ‘विशालवंश्यानां’। विशालता हि वंशस्य प्रजाप्राचुर्य्यात् गुणातिशय-योगाच्च। गुणातिशयस्तु उदितोदितत्वं, तद्विपरीतोऽस्तमितास्तमितत्वं। यत्र वंशे ऊर्द्धतनानामधस्तनानाञ्च पुरुषाणां वेदविद्यातदनुष्ठानसम्पन्नता स उदितोदितः, यस्तु तद्विहीनः सोऽस्तमितास्तमितः। ‘भूयसां’ गुणैर्महतां। ‘ऋषीणामिवाप्रतिग्राहकाणां’, यथा ऋषयोऽप्रतिग्राहका निर्द्वन्द्वत्वात् तथैते वंश्या गार्हस्थ्यधर्म्ममनुपालयन्तोऽप्यप्रति-ग्राहकाः, कुटलत्वात्। कुटो घटस्तं धान्यपूर्णं लान्ति संगृह्णन्ति इति कुटलाः कुम्भीधान्या इति प्रसिद्धिः। अतएव तेषां कुटलानामपत्यं कौटल्यो विष्णुगुप्तो नाम तद्वंशे यः प्रसिद्धो बभूवेति॥ २॥

---

* उपाध्यायनिरपेक्षायाः प्राचीनटीकाया उपयोगिभागमात्रमत्र गृहीतम्।

जातवेदा इव इति । 'जातवेदा इवार्चिष्मान्' अग्निरिव ब्रह्मतेजः-पुञ्जशाली, 'सुचतुरः' प्रज्ञातिशयाचारचातुर्य्यसम्पन्नः । 'वेदविदां' वेदपरमार्थविदां मध्ये 'वरः' श्रेष्ठः । स्पष्टमन्यत् ॥ ३ ॥

न केवलं वेदविदुक्तः कर्म्मणामपि अनुष्ठाता फलभोक्ता चैतद्दर्शयि-तुमाह । यस्येति । 'अभिचारवज्रेण' आभिमुख्येन साध्यं प्रति साधक-प्रयुक्तानां मन्त्राणां मारणाद्यर्थं चारो गमनं अभिचारः स एव वज्र-स्तेन । 'यस्य' गुरोः, 'वज्रज्वलनतेजसः' वैद्युताग्नितेजसः सम्बन्धिनः । वज्राग्निर्यथा प्रतिपक्षभूतैर्जलैर्नोपशाम्यति तद्वत् कौटिल्यकोपाग्निरपि नन्दादिभिः । *'पपातामूलतः' इति मूलं बन्ध्वादिमूलबलं तदारभ्य । 'नन्दः' इति नवनवतिकोटीश्वरः कश्चित् पृथिवीपतिः, अतएव 'श्रीमान्', स एव पर्वतः । 'सुपर्वा' इति पर्वशब्देन ख्यातिरुपलक्षिता । 'आमूलतः' इति अपुनरुत्थानाय ॥ ४ ॥

तस्य सुचतुरत्वमुक्तन्तत् समर्थयन्नाह । एकाकीति । 'एकाकी' शरीर-मात्रपरिच्छदः । 'मन्त्रशक्त्या' प्रज्ञातिशयचातुर्य्येण । 'शक्त्या' उत्साह-शक्त्या । 'शक्तिधरोपमः' कार्त्तिकेयतुल्यः । 'आजहार' आहृतवान् । मौर्यकुलप्रसूताय 'नृचन्द्राय चन्द्रगुप्ताय' इति चतुर्थी तादर्थ्ये ॥ ५ ॥

शुक्रबृहस्पत्योस्तृतीयमात्मगुरुं प्रख्यापयितुं तस्य च दण्डनीतिविषये प्रयोक्तृत्वमपि प्रतिपादयितुमाह । 'नीतिशास्त्रामृतं' इति । प्रत्यक्षा-क्षानुमानलक्षणप्रमाणत्रयनिर्णीतायां फलसिद्धौ देशकालानुकूल्ये सति यथासाध्यमुपायसाधनलक्षणा क्रिया नीतिस्तदर्थं शास्त्रं, कौटिल्य-भाष्यमित्यर्थः, तदेवामृतं । सुतरां तदभ्यासात् नरदेवत्वमाप्यत इत्यर्थः । 'श्रीमान्'† ब्राह्म्या श्रिया युक्तः । अर्थन्त इति अर्थाः धर्म्मार्थकामा-स्तत्प्रतिपादकं धर्म्मशास्त्रमर्थशास्त्रं प्राजापत्यं । तथा चोक्तं कामसूत्रे-ऽस्मद्गुरुणा, 'प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गस्य शासनमध्यायानां शतसहस्रेणाग्रे प्रोवाच, तस्यैकदेशं स्वायम्भुवो मनु-

---

* पपात मूलत इति मु० । † धीमानिति मु० ।

धर्म्माधिकारिकं पृथक् चकार, बृहस्पतिरर्थाधिकारिकमिति'।
तत्र लक्षाध्यायशततीयांशेन कोटिग्रन्थविस्तृतं सम्भाव्यत एवार्थशास्त्रं,
तदेव गाम्भीर्य्यात् महाप्रमाणत्वाच्च महोदधिरिव तस्मात्; 'य उद्दध्रे'*
य उद्धृतवान् 'तस्मै विष्णुगुप्ताय वेधसे नमः' स्पष्टं ॥ ६ ॥

नमस्कारानन्तरं महाकाव्यस्वरूपनीतिसारस्य सम्बन्धाभिधेयप्रयो-
जनान्यभिधातुं श्लोकद्वयमाह ॥ दर्शनात्तस्येति। 'तस्य' परमगुरोः
विष्णुगुप्तस्य 'दर्शनात्' शास्त्रात्, 'यत्' ज्ञानदृष्ट्या दृष्टं तदेवोपदेक्ष्याम
इति अभिधेयसङ्गतिः, महासम्बन्धश्चायं गुरुरर्थक्रमागतः। तथा चोक्तं-

"ब्रह्माऽध्यायसहस्राणां शतं चक्रे स्वबुद्धिजं।
तन्नारदेन शक्रेण गुरुणा भार्गवेण च ॥
भारद्वाजविशालाक्षभीष्मपाराशरैस्तथा।
संक्षिप्तं मनुना चैव तथा चान्यैर्महर्षिभिः॥
प्रजानामायुषो ह्रासं विज्ञाय च महात्मना।
संक्षिप्तं विष्णुगुप्तेन नृपाणामर्थसिद्धये" ॥ इति।

ब्रह्माद्याचार्य्यप्रणीतसंग्रहत्वादस्मत्प्रणीतप्रबन्धोऽपि प्रमाणमिति भावः।
'सुदृशः' सुदृष्टेः निर्मलज्ञानस्य। 'विद्यानां आन्वीक्षिकीत्रयीवार्त्तादण्ड-
नीतीनां, 'पारदृश्वनः' पारं दृष्टवान् इति पारदृश्वा तस्य। 'राजवि-
द्याप्रियतया', प्रियस्य भावः प्रियता, राजविद्यासु दण्डनीत्यादिकासु
प्रियतया हेतुभूतया। राजविद्याभिर्भूमीश्वरं व्युत्पाद्य रक्षादिभि-
र्जगतामुपकाराय पुण्यं भवत्विति प्रयोजनं। 'संक्षिप्तग्रन्थमर्थवत्'
संक्षिप्तः उपसंहृत एव ग्रन्थो यस्य तत् संक्षिप्तग्रन्थं, अर्थतस्तु ता-
वानेव विद्यते यस्य तदर्थवत्। अतएव सामर्थ्यान्नीतिसारमिदमेव ॥

'उपार्जने' इति। उपार्जनं लाभः, स च त्रिविधः मानवो भूतसंघो
मिश्रश्चेति। 'पालनं' रक्षणं, तत् द्विविधं स्वेभ्यः परेभ्यश्च। 'प्रति' उद्दिश्य।
'किञ्चित्' स्वल्पं। 'राजविद्याविदाम्' बार्हस्पत्यौसनसादीनां, 'मतं'

* समुद्दध्रे इति मु०।

अभिमतं विष्णुगुप्तदर्शनादेवोपदेक्ष्यामः। दृश्यते हि राजविद्याविन्मतादभिन्नं विष्णुगुप्तदर्शनं कौटल्यभाष्ये॥ ७॥ ८॥

अधुना राजत्त्वमभिधीयते। राजाऽस्येति। 'राजा' विजिगीषुः। 'अस्य' चातुर्वर्ण्याश्रमलक्षणस्य जगतः। 'हेतुः' कारणं। 'वृद्धेः' अभ्युदयस्य। विद्यातदनुष्ठानवृद्धानामभिमत इति 'वृद्धाभिसम्मतः' स्पष्टमन्यत्॥ ९॥

अन्वयेन जगतो हेतुत्वमभिधाय व्यतिरेकेणाप्यभिधातुमाह। 'यदि न स्यात्' इति। यदि नरपतिर्न स्यात् तदा प्रजा विप्लवेतेति सम्बन्धः। 'सम्यक्' शास्त्रस्थित्या। 'नेता' नायकः प्रजायाः, न्यायेन मार्गेण प्रजां नयति कर्णधारो नावमिव। 'ततः प्रजा' इति तदनन्तरमेव प्रजा चातुर्वर्ण्याश्रमलक्षणो लोकः॥ १०॥

प्रजापार्थिवयोः परस्परोपकारित्वं दर्शयितुमाह। धार्मिकमिति। प्रजा प्रजापतिमिव धार्मिकं पालनपरं परपुरञ्जयं राजानं सम्यक् अभिमन्येत॥ ११॥

प्रजां संरक्षतीति। 'पृथिवीपतिः' 'प्रजां' चातुर्वर्ण्यं 'संरक्षति' सम्यक् पालयति दण्ड्यदण्डनात्। 'सा' प्रजा, पृथिवीश्वरं 'वर्धयति' वृद्धिं नयति धान्यहिरण्यादिभिः। वर्द्धनादुक्तलक्षणात् रक्षणं कण्टकेभ्यः पालनं 'श्रेयः' श्रेयस्करं,* 'तन्नाशे' रक्षणाभावे, 'अन्यत्' वर्द्धनं 'सदपि' विद्यमानमपि 'असत्' अशोभनं, निरयहेतुत्वात्॥ १२॥

प्रजां संरक्षति नृप इत्युक्तं, स किमनुष्ठानस्तद्रक्षणक्षमस्तद्दर्शयितुमाह। न्यायेति। नीतिशास्त्रोक्तमनुष्ठानं न्यायः तस्मिन् प्रवृत्तः 'न्यायप्रवृत्तः' महीपतिरात्मानं 'त्रिवर्गेण' धर्मार्थकामलक्षणेन 'उपसन्धत्त' संयोजयति प्रथमं, तदनन्तरं प्रजास्त्रिवर्गेणोपसन्धत्ते इति समुच्चयः। 'अन्यथा' तदप्रवृत्तौ 'ध्रुवं' निश्चयेन आत्मानं निहन्ति, अनन्तरं मात्स्यन्यायेन प्रजाश्च। तस्मान्न्यायवृत्तेन राज्ञा भवितव्यमिति भावः॥ १३॥

* तदभावे सदप्यसदिति मु०।

एतदेव दृष्टान्तभूताभ्यामितिहासकथाभ्यां प्रदर्शयन्नाह। धर्मा-दिति। 'धर्मात्' शास्त्रोक्तात् हेतुभूतात् *वैजवनः 'चिराय' चिरकालं 'मही बुभुजे' इति। अत्र कथा। 'सगरान्वये इन्द्रसेनो नाम राजा रजस्वलया स्वदेव्या संगत इति राक्षसेन 'असुमारब्ध उक्तश्चैवं तेन त्वं यदि सर्वाः प्रजा धर्मे नियोजयसि तदा भक्षयामि इत्युक्तः प्राण-भयात् तथैवानुष्ठितवानित्यधर्म्मादचिरेण क्षयं गतः सः। तदनन्तरं तद्वंश्या अपि राक्षसवचनात् अधर्मादचिरेणैव विनाशं प्राप्ताः। तत-स्तस्मिन्नेव वैजवनो बभूव, तेन राक्षसवचनमनादृत्य भयं त्यक्त्वा सर्वाः प्रजा धर्मे नियोजिताः, स्वयमपि च धर्मपरो बभूव। अतः शास्त्रविहितानुष्ठानात् वैजवनो राजा चिरकालं पृथिवीं बुभुजे' इति। अनेन न्यायप्रवृत्तेः फलं दर्शितं भवति। अधर्माच्चैव नहुषाख्य ऐन्द्रपदस्थोऽपि शचीमभिलषन् यानवाहिनाऽगस्त्येन शप्तः सर्पीभूतः सशरीर एव रसातलं नरकं प्रपेदे॥ १४॥

एवं चान्यायवृत्तेः फलं प्रदर्श्य अनुष्ठेयपक्षं दर्शयितुमाह। तस्मा-दिति। यस्माद्धर्माधर्मफलमेवं 'तस्मात्' 'धर्मं' न्यायं 'पुरस्कृत्य' प्रधानं कृत्वा, 'अर्थाय' भूम्यादिविभवाय, 'पार्थिवो विजिगीषुः', 'यतेत' प्रयत्नं कुर्यात्। तत्र हेतुः धर्मश्चेत्यादिः। राज्यार्जनेन किं फलमिति चेत्? तस्य 'स्वादु' मिष्टं फलं 'श्रियो' विभूतयः॥ १५॥

तस्य राज्यस्य स्वरूपमभिधातुमाह। स्वाम्यमात्यश्चेति। 'स्वामी' शेषाङ्गानाममात्यादीनामीश्वरः प्राणभूतः। 'अमात्याः' मन्त्र्यादयः। 'राष्ट्रं' जनपदः। 'दुर्गं' दुःखेन गम्यत इति पर्वतादि। 'कोषः' कुष्यतेऽर्थिभिरा-ह्रियते इति। 'बलं' हस्त्यश्वरथपत्तिस्वरूपं चतुरङ्गं। 'सुहृत्' मित्रं। एतावदित्येतावत्संख्याङ्गं राज्यमभिधीयते। शुश्रूषाद्यष्टगुणा प्रज्ञा 'बुद्धिः'। 'सत्त्वं' प्रारब्धनिर्वहणाख्यं। सत्त्वञ्च बुद्धिश्च सत्त्वबुद्धी, ते व्यपाश्रयो बलाधायकोऽवष्टम्भो यस्य राजस्य तत्तयोक्तं॥ १६॥

---

* 'वै यवनः' इति मु०।

धर्म्मं पुरस्कृत्य अर्थाय यतेतेत्युक्तं तच्च कथमिति तदभिधातुमाह। आलम्ब्येति। 'आलम्ब्य' अवष्टभ्य। 'बलवत्' अदुर्बलं। 'सत्त्वं' उक्तलक्षणं। 'बुद्ध्या' उक्तलक्षणया प्रज्ञया। आलोकितो निर्णीतो निर्गमो निर्वाहो येन राज्ञा स तथोक्तः। 'अस्य' अनन्तरोक्तस्य सप्ताङ्गस्य राज्यस्य, 'लाभाय' प्राप्तये 'यतेत' यत्नं कुर्यात्। 'सततोत्थितः' सर्वदोद्यमयुक्तः॥ १७॥

एतदनुष्ठानं चतुर्विधमित्येतद्दर्शयितुमाह। न्यायेनेति। 'न्यायेन' शास्त्रोक्तेन। 'अर्जनं' अलब्धलाभादिकं। 'अर्थस्य' भूम्यादेः। 'रक्षणं' पालनं। 'वर्द्धनं' लब्धस्योपचयः। 'तथा' तेनैव प्रकारेण। 'सत्पात्रप्रतिपत्तिश्च' पात्राण्यत्र त्रिविधानि, धर्मपात्राणि, अर्थपात्राणि, कामपात्राणि च, तेषां सत्त्वमुत्तमत्वं, यदुद्दिश्य प्रतिपद्यते विनियुज्यते इति। तत्र सदनुष्ठाना ब्राह्मणास्तपस्विनश्च। अर्थपात्राणि मन्त्रिपुरोहितादयः। कामपात्राणि कमनीयाः स्त्रियः। तेषु प्रतिपादनार्थमेव राजवृत्तं विजिगीष्वनुष्ठानं चतुर्विधं भवति ॥१८॥

चतुर्विधेऽपि राजवृत्ते आद्यं अर्थार्जनाख्यमनुष्ठानमभिधातुमाह। नयविक्रमेति। नयो नीतिशास्त्रपरिज्ञानं, विक्रमः शौर्य्य, ताभ्यां सम्पन्नः, विक्रमे सत्यपि नयहीनोऽभिसन्धीयते। नये सत्यपि विक्रमहीनः परैरभिभूयते। ततश्च नयविक्रमाभ्यां सम्पन्नेन भवितव्यमिति 'सूत्थानः' शोभनमुत्थानमुद्योगो यस्य स तथोक्तः। शोभनत्वं चोत्थानप्रारम्भोपायः। पुरुषद्रव्यसम्पदापत्प्रतीकारानुकूलदेशकालकार्य्यादिनिर्णयं कृत्वा उत्थानं कार्यमिति भावः। 'चिन्तयेत्' श्रियमिति। श्रीर्हि श्रीहेतुत्वात् सप्ताङ्गं राज्यं, तदुपार्जनार्थं चिन्तां कुर्यादित्यर्थः। 'नयस्य' नीतिशास्त्रपरिज्ञानस्य, 'विनयः' स्वाभाविकेन्द्रियजयो 'मूलं' कारणं। नहि स्वाभाविकेन्द्रियजयरहितेन शास्त्रं ज्ञातुं शक्यते विषयाक्षिप्तचित्तत्वात्। विनयोऽत्र नयस्य कारणभूतः शास्त्रनिर्णयः॥१९॥

विनय इति। यो हि इन्द्रियजयः स कार्यभूतो 'विनयः'॥ २०॥

आत्मसम्पदं श्लोकद्वयेन दर्शयितुमाह । शास्त्रमित्यादि । 'शास्त्रं' इदमेव नीतिप्रवर्त्तकं । 'प्रज्ञा' अष्टगुणा बुद्धिः । 'धृतिः' सन्तुष्टचित्तता । 'दाक्ष्यं' कुशलता । 'प्रागल्भ्यं' अभीरुता । 'धारयिष्णुता' अवधारणशीलता । 'उत्साहः' शौर्य्यामर्षशीघ्रकारितेति गुणत्रययुक्तः । 'वाग्मिता' वाक्कौशलशालिता । दृढस्य भावो 'दार्ढ्यं' यत् प्रतिपद्यते तस्यापरित्यागः । 'आपत्क्लेशसहिष्णुता' दैवात् समुत्पन्नानामापदां शीतोष्णतृष्णादीनां क्लेशानाञ्च सहनशीलत्वं ॥

प्रभाव इति । 'प्रभावः' गुणविशेषः, येनाकोशदण्डोऽपि तद्वानिव दृश्यते द्विषद्भिर्नाभिभूयते चेति । 'शुचिता', परदारद्रव्यहिंसारहितता । 'मैत्री' सर्वसत्त्वेषु मित्रभावना। 'त्यागः', अर्थानां सत्पात्रप्रतिपादनं। 'सत्यं' अमृषावादः। 'कृतज्ञता' कृतमुपकारं प्रत्युपचिकीर्षया जानातीति कृतज्ञस्तस्य भावः। 'कुलं' शुद्धोभयपक्षता। 'शीलं' विशुद्धभावः। 'दमश्च' इति उपशमः। चकारोऽनुक्तानां सद्गुणानां समुच्चयार्थः। एते गुणा आत्मसम्पदो हेतवः ॥ २१ ॥ २२ ॥

राज्ञो विनयाभ्यासप्रकारं दर्शयितुमाह । आत्मानमिति । 'राजा' महीपतिः, 'प्रथमं' सर्वादौ, 'आत्मानं' 'विनयेनोपपादयेत्' इन्द्रियजयसम्पन्नं कुर्यादित्यर्थः । "राजा यच्छीलः प्रकृतयस्तच्छीला भवन्ति" इति कौटल्यः । ततो मन्त्र्यादीन्, ततो भृत्यान्, ततः पुत्रान्। अतः प्रजा जितेन्द्रियाः कर्त्तव्याः ॥ २३ ॥

विनयोपपादनफलमाह । सदेति । 'सदा' पूर्वोक्तगुणैरनुरक्ताः प्रकृतयो यस्य सः । स्पष्टमन्यत् ॥ २४ ॥

इन्द्रियाणां दुर्जयत्वं दर्शयितुमाह । प्रकीर्णेति । शब्दस्पर्शादयो विषयास्तेषां प्रकीर्णता बहुव्यापित्वं । प्रकीर्णविषया एव मनोरमत्वादरण्यं तत्र 'धावन्तं' 'विप्रमाथिनं' रिरंसया विशेषेण प्रमथ्नातीत्येवंशीलं, 'इन्द्रियदन्तिनं' 'ज्ञानाङ्कुशेन वश्यं कुर्व्वीत' इति स्पष्टं ॥ २५ ॥

तदेव दर्शयितुमाह । आत्मेति। 'आत्मा' यन्त्रवाहकः। प्रयत्नेनात्म-

गुणेन। अर्थेभ्यो विषयेभ्यः। 'मनः' वक्ष्यमाणलक्षणमधिरोहति। प्रयत्न-प्रेरितयोः 'आत्ममनसोः' 'संयोगात्' हेतोः 'प्रवृत्तिः' गतिर्विषयं प्रत्यु-पजायते॥ २६॥

प्रवृत्तेः कारणमभिधातुमाह। 'विषयामिषलोभेन' इति। विषय एवामिषमभिलषणीयं भक्ष्यं तल्लोभेन तदभिलाषेण, 'मनः' कर्त्तृ 'इन्द्रियं' विषयामिषं प्रति 'प्रेरयति'। अतः 'प्रयत्नेन तन्निरुन्ध्यात्' इत्यादिकं स्पष्टं॥ २७॥

यद्यपि आत्ममनःसंयोगात् प्रवृत्तिस्तथापि मन एव प्रधानं, व्यव-हारार्थन्तस्य हृत्पर्य्यायांश्च दर्शयितुमाह। विज्ञानमिति। विविधज्ञा-नोत्पत्तिनिमित्तत्वान्मनो 'विज्ञानं' उपचर्य्यते। अन्तर्हितत्वात् 'हृदयं'। चेतनाधारत्वात् 'चित्तं'। मननात् 'मनः'। बोधाधारत्वात् 'बुद्धिः'। तदेतत् संज्ञापञ्चकं समं तुल्यार्थं बोध्यं। 'अनेन' मनसा। आत्मा-ऽधिष्ठितः। 'करोति' विदधाति। 'इह' शरीरे। 'प्रवर्त्तननिवर्त्तने' कर्त्तव्याकर्त्तव्यकरणाकरणे॥ २८॥

एतादृशमनःप्रवृत्तौ प्रमाणमनुमानमेवेति दर्शयितुमाह। धर्माधर्मा-विति। 'धर्मः' प्रवृत्तिनिवृत्तिलक्षणः स्वर्गापवर्गफलः। 'अधर्मः' तद्विप-रीतः। 'सुखं' शोभनानि खानि बुद्धीन्द्रियाणि परितुष्टानि येन तत् सुखं। तद्विपरीतं 'दुःखं'। 'इच्छा' कामः। तद्विपरीतो 'द्वेषः'। 'तथैव' तेनैव प्रकारेण। 'प्रयत्नः' येन धृतं शरीरमवतिष्ठते। 'ज्ञानं' पदार्थ-स्वरूपावबोधः। 'संस्कारः' जन्मान्तरीणकर्माभ्यासवासनाविशेषः; एते गुणा आत्मनोऽस्तित्वे लिङ्गमिति आचार्य्यैरुपदिष्टं। धूमेनाग्निवदे-भिरात्मास्तित्वं प्रतीयत इति॥ २९॥

मनसोऽस्तित्वे लिङ्गमभिधातुमाह। ज्ञानस्येति। 'ज्ञानस्यायुगपद्भावः' पञ्चानामपि श्रोत्रादीनां बुद्धीन्द्रियाणां शब्दादिषु इन्द्रियार्थेषु सर्व-व्यापित्वात् आत्मनो युगपत् समकालमेव ज्ञानोत्पत्तौ प्राप्तायां भिन्न-कालेषु या ज्ञानोत्पत्तिः सा मनसोऽस्तित्वे लिङ्गं भवतीति अस्ति

मनःसंज्ञकं षष्ठं किञ्चिद्बुद्धीन्द्रियं, येनात्मनि समवेतेन सकलपदार्थानां ज्ञानातिक्रमात् अनुभूयते, तदभावे युगपत् ज्ञानोत्पत्तिर्न च दृश्यते, तस्मादस्ति मन इति। 'नानार्थेषु च सङ्कल्पः' नानाभूतेषु पृथग्भूतेषु सुखदुःखोत्पादकपदार्थेषु सङ्कल्पः, 'तस्य* कर्म प्रकीर्त्तितं' आचार्यैरिति शेषः॥ ३०॥

आत्ममनसोः स्वरूपमभिधाय इन्द्रियाणां इन्द्रियार्थानाञ्च तदभिधातुमाह। श्रोत्रमिति। शब्द इति च। स्पष्टं॥ ३१॥ ३२॥

आत्ममनोबुद्धिकर्मेन्द्रियाणां लक्षणमभिधाय बुद्धेरन्तःपरिकल्पनया कारणविभागमभिधातुमाह। आत्मा मनश्चेति। अभिहितेन लक्षणेनेति प्रतिपाद्यते यया विद्यया साऽन्वयविद्या, सा विद्यते येषां ते तद्विद्याः कणादाक्षपादादयः तैः 'तद्विद्यैः', 'आत्मा मनश्च', अन्तःकरणमुच्यते। 'आभ्यां' आत्ममनोभ्यां, प्रयत्नसहिताभ्यां 'सङ्कल्पः' प्रवृत्तिः, इन्द्रियप्रवर्त्तनं, 'उपजायते'॥ ३३॥

बहिःकरणमभिधातुमाह। आत्मा बुद्धीति। 'आत्मा' उक्तलक्षणः। 'बुद्धिः' मनः। 'इन्द्रियाणि' बाह्यरूपाणि। 'अर्थाः' शब्दादयः। कर्मेन्द्रियाणां हि उत्सर्गादिका अर्थाः प्रयोजनानि। एतत् सर्वं 'बहिःकरणं'। 'सङ्कल्पः' सम्यग्भूतार्थकल्पनं, 'अध्यवसायः' प्रयत्नविशेषः, ताभ्यां 'अस्य' आत्मनः, सुखानुभवलक्षणा 'सिद्धिः', 'प्रकीर्त्तिता'॥३४॥

तदेवं अन्तःकरणप्रवृत्तिः प्रयत्नादेव बहिःकरणप्रवृत्तिरपि अध्यवसायलक्षणात् प्रयत्नादेवेति दर्शितं भवति, एतदेव समर्थयन्नाह। उभे एते हीति। 'उभे एते' अनन्तरोक्ते, 'हि' स्फुटं, 'करणे' अन्तर्बहिःकरणसंज्ञके, 'यत्नामन्तर्यके' प्रयत्नानन्तरं वर्त्तेते, प्रयत्नप्रेरणादित्यर्थः। तस्मादिति। यस्मादेवं 'तस्मात्', 'प्रवृत्तिसंरोधात्' उभयात्मकस्य प्रयत्नस्यैव संरोधं कृत्वा, 'निर्मनस्कतां भावयेत्' निर्मनस्कभावं अभ्यस्येत्। यावत् प्रयत्न एव निरुद्धो भवति तावदात्मा मनसा न युज्यते, ततश्च

* तस्येत्यस्य स्थाने चास्येति मु०।

विद्यमानमपि मनो नास्त्येव मनःकार्य्याकरणात्। अन्तःकरणविश्लेषात् प्रवृत्तिर्नोपपद्यते। एवमन्तःकरणप्रवृत्त्यभावात् बहिःकरणप्रवृत्तेरप्यभावः। तदभावात् इन्द्रियाणां विषयैः सम्बन्ध एव न स्यात् इति भावः ॥ ३५ ॥

एवमिति। 'एवं' उक्तन्यायेन, करणयोरुभयोरपि सन्निरोधात् निरुद्धचेष्टं 'आत्मानं', 'आत्मना', एव च नान्येन कृत्वा 'संयम्य', नयो नीतिशास्त्रं अपनयस्तद्विपरीतः तौ जानातीति 'नयापनयवित्','राजा' महीपतिः, 'आत्मनः', 'हितं' नयानुष्ठानमेव, 'कुर्वीत' ॥ ३६ ॥

करणसंरोधः कर्त्तुं न शक्यते चेदभिमतफलमपि न प्राप्यते इत्येतद्दर्शयितुमाह। *यत् पृथिव्या इति। स्पष्टं ॥ ३६ क्रोड़ः ॥

एकस्यापि न पर्य्याप्तमित्येतद्दर्शयितुमाह। †एकस्यापि न यः शक्त इति। 'एकस्यापि' असहायस्य, 'मनसः', 'सन्निवर्हणे' जयकरणे, 'यः' 'न शक्तः' समर्थो न भवति, 'स कथं', बहुजेतव्यां 'महीं', ससागरां 'जेष्यति', न कथमपीत्यर्थः ॥ ३७ ॥

अनिगृहीतमनसः परिणामं दर्शयितुमाह। क्रियेति। 'अपहारिभिः' आपातरम्यः, 'अवसानविरसैः' परिणामरसहीनैः, स्पर्शादिभिः 'विषयैः', 'आच्छिन्नहृदयः', 'करीव' हस्तीव, 'ग्रहं' बन्धं, 'गच्छति'॥३८॥

स एवोग्रभयदामापदमाप्नोत्येवेति दर्शयितुमाह। सज्जमान इति। 'सज्जमानः' आसक्तिं गच्छन्। 'अकार्य्येषु' परस्त्रीगमनादिषु। 'विषयान्धीकृतेक्षणः' विषयैः स्पर्शादिभिरन्धीकृते ईक्षणे शास्त्रमये धर्ममये च यस्य स तथोक्तः। 'आवहति' सम्पादयति। 'उग्रभयदां' भीषणभयदायिनीं। 'स्वयं' आत्मनैव। 'आपदं' विपदं ॥ ३९ ॥

---

* यत्पृथिव्या व्रीहियवं हिरण्यं पशवः स्त्रियः।
एकस्यापि न पर्य्याप्तं तस्मात्तृष्णां त्यजेत् ॥ ३६ क्रोड़ः ॥
एष श्लोको मु॰ पु॰ नास्ति।
† एकस्यैव हि योऽशक्त इति मु॰।

भूयोऽपि विषयाणां वैधर्म्यं दर्शयितुमाह। शब्द इति। स्पष्टं॥४०॥

श्रुतिविषयलोभदोषमाह। शुचीति। विदूरं व्यवधानं तत्क्रमणं लङ्घनं तत्क्षमः 'विदूरक्रमणक्षमः'। 'मृगयते' अन्वेषयति। अन्यत् स्पष्टं॥४१॥

स्पर्शदोषमाह। गिरीन्द्रेति। महाकायो महाबलो हस्ती 'करिणी स्पर्शसंमोहात्', 'आलानं' बन्धनं, 'याति' प्राप्नोति॥४२॥

रूपाख्यविषयेऽपि दोषं दर्शयितुमाह। स्निग्धेति। 'पतन्' आत्मानं निक्षिपन्। अन्यत् स्पष्टं॥४३॥

रसेऽपि दोषं तथैव दर्शयन्नाह। दूरेऽपीति। दर्शनस्य व्यवधाने वर्तमानो दुरवगाहजलदुर्गे 'चरन्', मत्स्यः समांसं वड़िशं 'आस्वादयति', विनाशायेत्यर्थः॥४४॥

गन्धेऽपि दोषमभिधातुमाह। गन्धलुब्ध इति। 'असुखसञ्चारां' अतिक्लेशेन सञ्चरणं यस्यान्तां। 'गजकर्णझलज्झलां' अनुकरणशब्दविशेषां। दन्तिनः कर्णगतिर्झलज्झलेत्युच्यते। अन्यत् स्पष्टं॥४५॥

प्रागुक्तमुपसंहरन्नाह। एकैकश इति। 'एकैकशः' प्रत्येकमपि। 'विनिघ्नन्ति' विनाशयन्ति। 'विषयाः' स्पर्शादयः। 'विषसन्निभाः' विषतुल्याः, मारणात्मकत्वात्। 'यः' पृथिवीपतिः। 'समं' समासेन आग्रहेण। 'पञ्च' विषयान्, 'सेवते' सक्तो भवति॥४६॥

एवं सर्वथा विषयसेवानिषेधे प्राप्ते चायं नियम इति दर्शयन्नाह। सेवेतेति। 'सेवेत' उपभुञ्जीत। 'काले' तत्सेवावसरे। धर्मार्थाविरोधेन कामं सेवेत निःसुखो न स्यादिति कौटिल्योक्तिः। अन्यत् स्पष्टं॥ ॥४७॥

विषयसेवातत्परत्वे दोषं दर्शयन्नाह। निकाममिति। 'निकामं' अत्यर्थं। 'सक्तमनसां' संश्लिष्टचित्तानां। 'गलन्ति' च्यवन्ते। 'गलिताश्रूणां' च्युतनयनजलानां। 'यौवनेन सह' युवभावेन समं। 'श्रियः' विभूतयः। एतदुक्तं भवति, यावत् कान्तामुखविलोकनासक्तमना

भवति तावद्दोगाभावात् अरिभिरपहृते राज्ये कान्तया सहैकान्तस्थितस्याश्रुभिः सह श्रीभिर्युतं यौवनं गलतीत्यर्थः ॥ ४८ ॥

विषयेऽसक्तौ दोषाभावं त्रिवर्गस्य च कार्यकारणभावं दर्शयितुमाह। धर्मादिति। 'धर्मात्' शास्त्रोक्तलक्षणात् विधिनिषेधरूपात् कारणभूतात्, 'अर्थः' भूमिहिरण्यादिरूपकार्यभूतः भवति। 'अर्थात् कामः', लभ्यते। 'कामात्', 'सुखफलोदयः'। 'यः' कामः, 'युक्त्या' शास्त्रोक्तसेवाकालमात्रया, 'न *निषेव्यते' नानुष्ठीयते, स '†तौ' इतरौ धर्मार्थौ, 'हत्वा' 'आत्मनं' अपि 'हन्ति'। तद्यथा धर्मातिसेवायामर्थः क्षीयते, अर्थक्षयात् कामाभावः अर्थमूलत्वात् कामस्य, अर्थाभावात् शरीरदहनं, धर्मं चिकीर्षुः शरीरं क्षीणं करोति, ततः शरीरे विनष्टे धर्मोऽपि विनश्यति। एवमर्थोऽपि अतिसेवितोऽर्थमूलं धर्मं न करोति कामञ्च। ततश्चाप्युपचितोऽर्थः चौरराजादिभिरपक्रीयते। तथा कामोऽपि अतिसेवितो धर्मार्थानुष्ठानव्युपरमात् तौ विनाश्य शुक्रक्षयात् क्षयव्याधिना शरीरमपि विनाशयति ॥ ४९ ॥

विषयाणामतिमनोहरत्वमिन्द्रियाणाञ्च दुर्जयत्वं दर्शयन्नाह। नामापीति। 'विलासोल्लसितभ्रुवः' विलासेन विभ्रमेण उल्लासिते भ्रुवौ यया तस्याः। स्पष्टमन्यत् ॥ ५० ॥

एतदर्थापकं वाक्यं वीतरागाणामदर्शनादित्याशङ्क्याह। रहःप्रचारेति। रहःप्रचारः उपगूहनचुम्बनाद्यष्टकादिपरिकल्पितः, तत्र कुशलाऽतिप्रवीणा 'रहःप्रचारकुशला'। मृदु अकठोरं गद्गदं मन्थरं भाषितुं शीलं यस्याः सा। 'कं' नाम शरीरिणं। 'न रमयति' न रमणक्रीडासक्तं करोति अपि तु सर्वमपि करोत्येव। रक्तान्तत्वं लोचनयोर्लक्षणं रम्यता चेति ॥ ५१ ॥

एतत् द्रढयितुमाह। मुनेरपीति। 'मुनेरपि' मुमुक्षोरपि महर्षेः,

---

* निषेवत इति मु०।

† तावित्यस्य स्थाने तामिति मु०।

'मनः' चेतः, 'सरागं' साभिलाषं, जितेन्द्रियत्वेऽपि 'अवश्यं' अवशीभूतं कृत्वा, अथवा अवश्यं निश्चयेन सरागं कुरुते 'अङ्गना'। का किमिव 'सन्ध्या शशिमण्डलमिव'। अतः कं नारी न रमयतीति स्थितं ॥ ५२ ॥

एतदेवाचेतनेष्वपि दर्शयितुमाह। 'मन इति। सर्वेषां 'मनः' चित्तं, 'प्रह्लादयन्तीभिः', आनन्दहेतुत्वात् अपां स्त्रीणां च। *मन्दयन्तीभिः गाम्भीर्यादपां, स्तनजघनभारवत्त्वात् स्त्रीणामपि, 'अलं' अत्यर्थं, 'महान्तोऽपि' गिरिभिन्नाः। 'अचला इवाद्भिः' 'भिद्यन्ते' अन्तः प्रविश्य भूमिसात्क्रियन्ते स्त्रीभिरित्यर्थः ॥ ५३ ॥

न केवलं स्त्रीविषयाऽऽसक्तिस्त्याज्या सा च विनाशाय भवति तज्जन्यं मृगयादिव्यसनत्रयमपीति दर्शयन्नाह। मृगयेति। स्त्रीसेवाया बलहानिकरत्वात् मांसाभिलाषे मृगयाव्यसनं। स्त्रीभिः सह पानगोष्ठ्यां पानव्यसनं। ताभिरेव विनोदार्थं अक्षक्रीडाव्यसनं। त्रयमिति कामजोऽयं त्रिवर्गः। स्पष्टमन्यत् ॥ ५४ ॥

यथा कामोऽतिप्रवृद्धो विनाशहेतुत्वादरिः, एवं क्रोधादयोऽपीत्यरिषड्वर्गमभिधातुमाह। काम इति। 'कामः' तन्त्रोक्तलक्षणः, "स्पर्शविशेषविषया इच्छाभिमानिकसुखानुविद्धा, फलवती अर्थप्रतीतिः" इति। 'क्रोधः' अविमृश्यकारितया प्राणिद्रोहबुद्धिः। 'लोभः' वित्तेष्वतिलोलुपता। 'हर्षः' कारणं विना प्राणिहिंसाजनितः परितोषः। 'मानः' माननीयेष्ववमानबुद्धिः। 'मदः' बलावलेपजनित उत्सर्ग इत्ययं षड्वर्गः। उत्तरार्द्धं स्पष्टं ॥ ५५ ॥

अरिषड्वर्गपरिपालनदोषं श्लोकद्वयेन दर्शयन्नाह। †दाण्डक्य इति। दण्डकविषयाधिपतिः 'दाण्डक्यः' इक्ष्वाकुनामा भूपतिः। स च मृगयागतो भृगोः कन्यामकामां धर्षयन् भृगोः शापात् पांसुवृष्टिभिः सबन्धुर्विननाश। 'क्रोधाच्च जनमेजयः' अश्वमेधकर्मणि शिखलक्षीकृतां

* मदयन्तीभिरिति मु०।

† दण्डक इति म०।

पत्नीं दृष्ट्वा, ऋत्विग्भिरेवं कृतमिति तेषु विक्रान्तः, तैः शापेनाभिहतः। 'लोभात्' चातुर्वर्ण्यं सर्वस्वापहरणैरतिपीड़यन् प्रजाभिरेकैकलोष्ट-निक्षेपविधिना 'ऐलः' इलागर्भे बुधजातः पुरूरवाः अभिहतः। 'वातापिर्हर्षतोऽसुरः' इति, वातापील्वलसंज्ञकौ कामरूपिणौ महाऽसुरौ कृतकृतकवेशौ महर्षीन् आमन्त्र्य, आत्मनोरेकं कृतपशुरूपं घातयित्वा तन्मांसैर्महर्षींस्तर्पयति, भुक्तोत्थितेषु च तेषु एह्येहीत्यन्यतरो ब्रूते, मृतसञ्जीवनविद्यया च जीवित इत्वलो विदार्य महर्षीणामुदरं स्मा-न्निःसृत्य भ्रातुर्गले लगति, ततस्तौ हृष्टौ भवतः, एवमुपद्रवकारिणौ तावागतेनागस्त्येन निहतौ, इति ॥ ५६ ॥

पौलस्त्य इति। शत्रुषड्वर्गमिति। 'पौलस्त्यः' रावणः, 'राक्षसः' 'मानात्', रामचन्द्राय सीतामसमर्पयन् विननाश। 'मदात्', 'दम्भोद्भवः' नाम सार्थकनामा महासुरः, अनेकसुरजित् त्रिभुवने नास्ति मे प्रति-मल्लः मत्सम इति मदेन नारदमभ्यर्थितवान् दर्शय मे प्रतिमल्लमिति, नारदेन तु ईषिकास्त्रेन स विनष्टः। 'एते' दाण्डक्यादयः, 'शत्रुषड्वर्ग-माश्रिताः', 'निधनं', गताः ॥ ५७ ॥

अरिषड्वर्गपरित्यागे प्रकृष्टफलमाह। शत्रुषड्वर्गमिति। 'जामदग्न्याम्बरीषौ', 'शत्रुषड्वर्गमुत्सृज्य', 'चिरं मही बुभुजाते', इति स्पष्टं तस्माच्छ्रेयोऽर्थिना अरिषड्वर्गत्यागेन इन्द्रियविनयः कर्त्तव्य इति ॥ ५८ ॥

इन्द्रियजयप्रकरणे इन्द्रियजयकारणं विद्यावृद्धसंयोगमभिधातुमाह। *वर्द्धयन्निवेति। पुरुषेण पुमर्थद्वयोपार्ज्जनाय यतितव्यं। तौ च 'धर्मार्थौ', उपादेयत्वात् साधुभिः 'आदरात् सेवितौ', अतस्तौ 'वर्द्धयन्', 'गुरुसेवनं' विद्यावृद्धाराधनं, 'कुर्वीत'। कथमिति 'निग्रहीतेन्द्रिय-ग्रामः', सन् इति स्पष्टं ॥ ५८ क्रोड़ः ॥

---

* वर्धयन्निव धर्मार्थौ सेवितौ सद्भिरादरात्।
निग्रहीतेन्द्रियग्रामः कुर्वीत गुरुसेवनम् ॥ ५८ क्रोड़ः ॥

श्लोकोऽयं मु० पु० नास्ति।

किमर्थं गुरुसेवनं कुर्वीतेत्याह। शास्त्रायेति। 'शास्त्राय' शास्त्रं आन्वीक्षिक्यादिविद्याचतुष्टयं तदर्थं, 'गुरुसंयोगः', कर्त्तव्यः। 'शास्त्रं', किमर्थं? 'विनयवृद्धये' इन्द्रियजयवृद्ध्यर्थं। स एव विनयः शास्त्रेणोपबृंहितःकृतक इति व्यपदिश्यते। 'विद्याविनीतः' इति विद्योपबृंहितेन्द्रियजयकृतविनयसम्पन्नः, 'नृपतिः', न 'कृच्छ्रेषु' विपज्जनितक्लेशेषु, 'अवसीदति' विषस्रो भवति ॥ ५९ ॥

उपकारं च वृद्धसंयोगे दर्शयन्नाह। वृद्धोपसेवीति। विद्यावृद्धसेवाधीनः 'नृपतिः', साधुसेव्यो भवति। तथा 'प्रेर्यमाणोऽपि', दासकितवादिभिः, 'अकार्येषु' परदारदूषणादिषु, 'न प्रवर्त्तते' ॥ ६० ॥

विद्याग्रहणोत्तरकालमपि अवशिष्टविद्यांशा ग्राह्या एवेति दर्शयन्नाह। आदधान इति। सकलकलापरिपूर्णो भवतीत्यर्थः। इति इन्द्रियजयलक्षणं ॥ ६१ ॥

विनयस्य फलं दर्शयन्नाह। जितेन्द्रियस्येति। 'नीतिमार्गानुसारिणः' नयसम्पन्नस्य, 'ज्वलिताः' भास्वराः, 'लक्ष्म्यः' विभूतयः, 'कीर्त्तयश्च' यशांसि च, 'नभःस्पृशः' दिगन्तव्यापिन्यः, भवन्तीत्यर्थः ॥ ६२ ॥

इन्द्रियजयवृद्धसंयोगानुपसंहरन्नाह। इति स्मेति। 'नयान्वितः' वृद्धसेवनात् अवाप्तनीत्यन्वितः,'राजा','इति' अनेन प्रकारेण,'विनयं'* इन्द्रियजयं,'निषेवमाणः' अनुतिष्ठन्, 'नरदेवसेवितं' षोडशमहाराजाध्यासितं, 'श्रियः' 'पदं' महाचक्रवर्त्तिस्थानं, 'समाक्रामति' अध्यास्ते। 'भास्वरं' दीप्ततरं, 'शिरः' 'महारत्नगिरेः' सुमेरोः शिखरम् 'इव', इन्द्रत्वमित्यर्थः, 'उन्नतं' अकृतपुण्यैरप्राप्यं प्राप्नोतीत्यर्थः ॥ ६३ ॥

विनयो राजकुमारेषु पुनराधेय इति दर्शयन्नाह। इयं हीति। 'इयं', 'पार्थिवता' राजत्वं, 'लोकव्यतिरेकवर्त्तिनी' लोकोऽन्यथा वर्त्ततेऽन्यथा पार्थिवः, यतः 'स्वभावतः', एव विनयाभावात् 'समुन्नता' अप्रतिहता। 'बलात्' आक्रम्य गुरुः 'विनये', नियोजयेत्। यतः

---

* विनयौ इति मु०।

'नयस्य' शास्त्रानुष्ठानस्य, 'विनयः' इन्द्रियजयः 'पुरःसरः' साधक इत्यर्थः॥ ६४॥

बलान्नयनियोजने गुणं दर्शयन्नाह। परां विनीत इति। 'विनीतः', राजा 'परां' उत्कृष्टां, 'सेव्यतां', प्राप्नोति। मही्पतिविभूषणानां दुर्लभत्वात् विनय एवालङ्कारः। 'करीव भद्रः', अर्थात् राजा 'श्रियेव शोभते' सुगमं॥ ६५॥

किमर्थं विद्यावृद्धसंयोगः क्रियते इति दर्शयन्नाह। गुरुस्त्विति। 'गुरुः' विद्यावृद्धः, 'विद्याधिगमाय', अभिहितविद्यापरिणतये, 'सेव्यते'। सा च 'श्रुता', 'विद्या', समये 'मतये' प्रज्ञायै भवति। श्रुतानुष्ठानवृत्तीनि चानुष्ठीयमानानि 'भूतये' श्रिये, 'असंशयं भवन्ति'॥ ६६॥

भूयोऽपि वृद्धसंयोगजनितविनयस्य प्रयोजनं दर्शयन्नाह। सुनिपुणमिति। 'शुचिः' बाह्याभ्यन्तरशौचयुक्तः, 'अनुवृत्तिपरः' शुश्रूषातत्परः। 'नृपतिपदाय' चक्रवर्त्तिस्थानाय। स्पष्टमन्यत्॥ ६७॥

इन्द्रियजयवृद्धसंयोगयोरननुष्ठाने दोषं अनुष्ठाने च गुणं दर्शयन्नाह। अविनयरतमिति। इन्द्रियजयो विनयः, तदन्यथात्वमविनयः तद्रतं व्यसनासक्तं नृपम् 'अवशं' असाध्यम्, अतः 'विद्विषः' रिपवः, 'वशं नयन्ति'। विनीतः पुनः 'तनुरपि' कृशोऽपि, 'क्वचित् पराभवं', 'नैति', न याति॥ ६८॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां प्रथमः सर्गः॥ ॥

पूर्वसर्गोल्लिखितविद्यानामुद्देशमभिधातुमाह। आन्वीक्षिकीमिति। आन्वीक्षिक्याद्या विद्यास्तत्त्वतोऽपि वक्ष्यमाणलक्षणाः। 'तद्विद्यैः' ता एव विद्या निर्मला येषां तैः। 'तत्क्रियोपेतैः' तदनुष्ठानयुक्तैः। स्पष्टमन्यत्॥ ॥ १ ॥

आदरात् विद्याचतुष्टयचिन्तने प्रयोजनमाह। आन्वीक्षिकीति। 'शाश्वती' प्रत्येकमविनाशिनी। 'एता एव' इत्येवकारेण नान्ये केचन लोकस्थितिहेतव इत्यर्थः। अन्यत् सुगमं॥ २ ॥

विद्यासङ्ख्याविषये विप्रतिपत्तिं दर्शयन्नाह। त्रयीति। तिस्रो विद्या मनुशिष्या मन्यन्ते। कुत इत्याह, हि यस्मात् या इयमान्वीक्षिकी सा त्रय्या विशेष एवेति मता॥ ३॥

बार्हस्पत्यास्तु विद्याद्वयमेव मन्यन्ते इति दर्शयन्नाह। वार्त्तेति। 'वार्त्ता च दण्डनीतिश्च' वक्ष्यमाणलक्षणे 'द्वे' एव 'विद्ये' 'इत्यवस्थिते' कृतनिश्चये। कुत इत्याह, 'लोकस्यार्थप्रधानत्वात्' इति चातुर्वर्ण्यस्य लोकस्य अर्थः भूम्यादिलक्षणः तस्मिन् प्रधानत्वात् प्रधानवृत्तिहेतुत्वात्, सर्वार्थो वार्त्तया लभ्यते दण्डनीत्यापि लभ्यते इति 'सुरपूरोधसः' बृह-स्पतेः 'शिष्याः' अन्तेवासिनो मन्यन्ते॥ ४ ॥

शुक्राचार्य्यस्यासुरगुरोः शिष्या एकामेव विद्यां मन्यन्ते इति दर्श-यन्नाह। एकैवेति। दण्डनीतिरिदमेव शास्त्रं, यस्मात् तस्यामेव सर्व-विद्यारम्भाः प्रतिष्ठिताः। दण्डनीतेरभावात् मात्स्यन्यायेन सर्वविद्या-रम्भ एव न सम्भवति॥ ५ ॥

पूर्वपक्षमभिधाय सिद्धान्तमभिधातुमाह। विद्याश्चतस्र इति। नोऽस्माकं गुरोः कौटल्यस्य दर्शनं विद्याश्चतस्र एव न न्यूनाधिका वा। यस्मात् पृथक् पृथक् प्रकृष्टसिद्ध्यर्थं आसु विद्यासु लोकः व्यवस्थितः ॥ ६ ॥

विद्यानां स्वरूपभेदं दर्शयन्नाह। आन्वीक्षिकीति। प्रत्यक्षपरो-क्षाभ्यामीक्षितस्य अर्थस्यानु पश्चात् ईक्षणं अन्वीक्षा सा प्रयोजनं

यस्याः सा 'आन्वीक्षिकी' अनुमानविद्या न्यायदर्शनवैशेषिकादिका, सा च 'आत्मविज्ञानं' आत्माऽनया विशेषेण ज्ञायत इत्यात्मविज्ञानं। तादृशविज्ञानाच्च उभयलोकसिद्धौ 'धर्माधर्मौ त्रयीस्थितौ' इति तत्त्वतो ज्ञायते। 'अर्थानर्थौ तु वार्त्तायां दण्डनीत्यां नयानयौ' वक्ष्यमाणलक्षणौ ज्ञायेते इत्यर्थः॥ ७॥

दण्डनीतेर्माहात्म्यं दर्शयन्नाह। आन्वीक्षिकीति। आन्वीक्षिक्याद्याः तिस्रो विद्याः सत्यः सद्विद्याः धर्मार्थसंसाधिकाः। यस्मात् दण्डनीतेः नीतिशास्त्रस्य विनाशे सति ताः सत्यो विद्या असत्यो मात्स्यन्यायेन भवन्तीत्यर्थः॥ ८॥

एतदेव दर्शयन्नाह। दण्डनीतिर्यदेति। 'सम्यक् नेतारं' विशिष्टं नायकं विजिगीषुं अधितिष्ठति, तादृशेन विजिगीषुणा यदा सद्दण्डनीतिरनुष्ठीयत इत्यर्थः। 'तदा शेषाः' आन्वीक्षिक्यादिविद्यास्तिस्रः, तादृशविद्याविदं सम्यक् उपासते इति॥ ९॥

विद्यालक्षणात् लाभं दर्शयन्नाह। वर्णा इति। 'वर्णाः' ब्राह्मणादयः। 'आश्रमाः' ब्रह्मचारिप्रभृतयः। 'आसु' आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिषु विद्यासु, 'प्रतिष्ठिताः' यथासम्भवं प्रतिष्ठां गताः। तद्यथा, त्रय्यां ब्राह्मणाः। दण्डनीत्यां राजानः। वार्त्तायां वैश्याः शूद्राश्च। आन्वीक्षिक्यां ब्रह्मचार्य्यादयः। एवञ्च तासामवेक्षणात् रक्षणाच्च राजा तद्धर्मस्य वर्णाश्रमोपार्जितस्यांशभाक् भवति, षष्ठांशभागी नृपो भवतीति स्मृतेरित्यर्थः॥ १०॥

विद्याजनितानि उपकारान्तराणि दर्शयन्नाह। आन्वीक्षिक्यात्मविद्येति। 'आन्वीक्षिकी' उक्तलक्षणा, आत्माऽनया ज्ञायते इति 'आत्मविद्या', सुखदुःखयोः कार्यकारणभावेन 'ईक्षणात्' निरूपणात् भवति। 'तया' आन्वीक्षिक्या, 'तत्त्वं' परमार्थं, 'ईक्षमाणः', 'हर्षशोकौ' 'व्युदस्यति' परित्यजति। धर्मः कारणं, सुखं कार्यं, अधर्मः कारणं, दुःखं कार्यं, एतदुभयमपि उपभोगात् क्षयं याति नान्यथा इत्येवमनुमानादि-

प्रमाणैस्तत्त्वदर्शी विजिगीषुर्हर्षशोकौ 'सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखं' इति चिन्तनेन व्युदस्यति त्यजतीत्यर्थः॥ ११॥

आन्वीक्षिकीजनितोपकारो दर्शितः साम्प्रतं त्रय्याः स्वरूपं तज्जनितोपकारादिकं चाभिधातुमाह। ऋग्यजुः सामेति। ऋगादयस्त्रयो वेदाः 'त्रयी' इत्युच्यते। 'त्रय्यां' विध्यनतिक्रमेण 'तिष्ठन्' 'उभौ लोकौ' इहलोकपरलोकौ, 'अवाप्नोति', ॥ १२ ॥

न केवलमेतत् वेदत्रयं त्रयी, अपरमपि त्रयीस्वरूपं दर्शयन्नाह। अङ्गानीति। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडपि वेदस्य 'अङ्गानि'। 'वेदाः' इत्यथर्ववेदेन सह चत्वारः। 'मीमांसा' वेदप्रमाणशास्त्रं। 'न्यायविस्तरः' इति न्यायदर्शनवैशेषिकादिः। 'धर्मशास्त्रं' मन्वादि। 'पुराणं' अष्टादशविधं। चकारात् महाभारतरामायणादीनामपि पुराणान्तर्भावो द्रष्टव्यः कथास्वरूपत्वात्। एतत्सर्वं चतुर्दशविद्यास्थानरूपा 'त्रयी' इत्युच्यते॥ १३॥

त्रय्याः स्वरूपादिकमुक्तं सम्प्रति वार्त्तायाः स्वरूपं तदुपकारञ्च अभिधातुमाह। पाशुपाल्यमिति। पशून् हस्त्यश्वादीन् पालयन्तीति पशुपालाः हस्तिशिक्षाशालिहोत्रादिविदः, तेषां शास्त्रमनुष्ठानञ्च 'पाशुपाल्यं'। 'कृषिः' कर्षणं तत्प्रतिपादकं पराशरादिशास्त्रं तदनुष्ठानञ्च। 'पण्यं' क्रयविक्रयादिलक्षणं वाणिज्यं एतस्त्रितयं, 'वार्त्ता' जगद्वृत्तिहेतुत्वात्। एतया वार्त्तया सम्पन्नो विजिगीषुः *साधु यथा भवति तथा न 'आवृत्तेः' आवर्त्तनात् 'भयमृच्छति' प्राप्नोति॥ १४॥

दण्डनीतेः स्वरूपं उपकारञ्च दर्शयितुमाह। दमो दण्ड इतीति। 'दमः' वधपरिक्लेशार्थहरणादिना दमनक्रिया, 'दण्डः' अभिधीयते। तात्स्थ्यात् प्रयोक्तरि तिष्ठतीति उपचारात् महीपतिर्दण्डः तस्य नीतिरिदं शास्त्रं दण्डनीतिः, नयनं दण्ड्यं प्रति दण्डस्य प्रणयनं नीतिरिहोच्यते॥ १५॥

* साधुरिति मु०।

दण्डनीत्या स्वात्मनो विद्यानाञ्च पालनमाह। तयेति। स्पष्टं ॥ १६ ॥

विद्यानां स्वरूपोपकारादिभिर्भेदं दर्शयित्वाऽभिधानतोऽपि दर्शयन्नाह। विद्याद्यदाभिरिति। 'आभिः' आन्वीक्षिकीत्रयीवार्त्ताभिः। चतुर्वर्गं धर्मार्थकाममोक्षान्, यथासम्भवं 'यदा' महीपतिः 'विद्यात्' विचारयेत्, तदा आन्वीक्षिक्या 'विद्यात्वं'। विद् विचारणे इति धातोरिदं रूपं। तथा चतुर्वर्गं यदा विद्यात् जानीयात्, तदा त्रय्या विद्यात्वं, विद् ज्ञाने इति धातोरिदं रूपं। यदा 'विद्यात्' लभेतेति तदा वार्त्ताया विद्यात्वं। विद् लाभे इति धातोरिदं रूपं ॥ १७ ॥

॥ इति विद्याप्रकरणं ॥

वर्णाश्रमधर्मं स्वधर्मच्युतानां दण्डप्रणयनार्थमभिधातुमाह श्लोकचतुष्टयेन। इज्येति। याजनेति। शस्त्रेणेति। शूद्रस्येति। कारवः शिल्पिनः। चारणाः रङ्गजीविनः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

इदानीं ब्रह्मचारिद्वयस्वरूपमाह। गुराविति। नैष्ठिकस्य ब्रह्मचारिणः 'गुरौ' गुरुगृहे 'वासः', 'अग्निशुश्रूषा' इति वैश्वानराराधनं, 'स्वाध्यायः' स्वशाखाध्ययनं। 'व्रतचारणं' तदुपदिष्टानां व्रतानामनुष्ठानं, 'त्रिकालस्नायिता' सन्ध्यात्रयेऽपि स्नानं। 'भैक्ष्यं' भिक्षासमूहः एकभिक्षाया निषिद्धत्वात्, 'गुरौ प्राणान्तिकी स्थितिः' इति प्राणान्तं यावत् गुरावेव स्थितिरित्यर्थः ॥ २२ ॥

गुरोरभावे तस्य वासनियमं दर्शयन्नाह। तदभावे इति। 'तदभावे' गुरोरभावे। 'सब्रह्मचारी' सहाध्यायी। 'वा' अथवा, 'कामतः' स्वेच्छया, 'अन्याश्रमत्वं' इति यदि नैष्ठिक उपकुर्वाण एव ॥ २३ ॥

भूयोऽपि ब्रह्मचारिधर्मविशेषमाह। स मेखलीति। 'सः' उपकुर्वाणो ब्रह्मचारी, 'मेखली' मौञ्जी मेखला यस्यास्तीति। 'दण्डी' पालाशदण्डधारणात्। 'जटी मुण्डो वा' तथैव गुरुसंश्रयः। आविद्याग्रहणात् व्रतादिकं विद्याग्रहणञ्च यावत् कुर्यात्, ततः इच्छा चेत् गृहस्थः स्यात् अन्यथा नैष्ठिकः स्यात् इत्यर्थः ॥ २४ ॥

गृहस्थधर्ममभिधातुमाह। अग्निहोत्रेति। गृहस्थोऽत्र चतुर्विधः। अपरञ्च अग्निहोत्रेति। ब्राह्मणादिभिरग्निहोत्रोपचरणं यथा सम्भवं ब्राह्मणक्षत्रियवैश्यानामेव द्रष्टव्यं। 'जीवनञ्च स्वकर्मभिः' इति ब्राह्मणस्य प्रतिग्रहेण, क्षत्रियस्य शस्त्रेण, वैश्यस्य कृषिपाशुपाल्यवाणिज्यादिभिः, शूद्रस्य कार्वादिभिः। 'अयञ्च धर्मः' नियमात्, धर्मदारेषु 'पर्ववर्ज' पौर्णमास्यादिपुण्यतिथिवर्जं, 'रतिक्रिया' ॥ २५ ॥

धर्मार्थं दाररक्षार्थञ्चेत्याह। देवेति। देवपितृतिथिभृत्यपूजेति प्रतीतं। 'दीनानुकम्पनं' बालवृद्धव्याधितानां शक्त्याऽनुकम्पनं। 'श्रुतिः' वेदः, 'स्मृतिः' मन्वादिशास्त्रं, तेषां 'अर्थः' तत्र 'अवस्थितिः' तदुक्तानुष्ठानपरेण भवितव्यमित्यर्थः। अयं धर्मश्चतुर्विधस्यापि 'गृहमेधिनः' गृहे अवस्थातुं मेधा बुद्धिर्यस्य विद्यते तस्यायं धर्म इत्यर्थः॥ २६ ॥

वानप्रस्थधर्ममभिधातुमाह। जटित्वमिति*। 'जटित्वं' नियमाज्जटाधारणं 'अग्निहोत्रत्वं' अग्निहोत्रपरिग्रहश्च, तथैव भूमौ शय्या, कृष्णाजिनधारणञ्च। वने निर्जने वा वासः 'वनवासः' अन्यत् स्पष्टं ॥ २७ ॥

वनवासिधर्ममाह। प्रतिग्रहेति। प्रतिग्रहस्य दीयमानस्य हिरण्यादेः ग्रहणनिवृत्तिः 'प्रतिग्रहनिवृत्तिः' 'त्रिः स्नानं' सन्ध्यात्रये स्नानं, 'व्रतचारिता' ब्रह्मचारिता सन्निहितदारेणापि ब्रह्मचर्यमेव कर्त्तव्यं। उत्तरार्द्धमेव प्रतीतं ॥ २८ ॥

परिव्राड्धर्ममभिधातुमाह। सर्वारम्भेति। 'निष्परिग्रहता' पुस्तकादेर्वस्त्रावरणादेरपि परिग्रहो नास्तीति। 'अद्रोहः' भूतहिंसाभावः। 'समता सर्वजन्तुषु' उपकार्य्यपकारिष्वपि तुल्यबुद्धिः ॥ २९ ॥

अपरञ्च, प्रियाप्रियेति। प्रियञ्चाप्रियञ्च तयोरपरिष्वङ्गः अनासक्तिः 'प्रियाप्रियापरिष्वङ्गः†' सुखादौ विकारो हर्षशोकः कुतो नास्तीति

---

* जडत्वमिति मु०।

† प्रियाप्रियपरिष्वङ्गः इति मु०।

'सुखदुःखाविकारत्वात्' सबाह्याभ्यन्तरशौचमिति 'बाह्यं' मृज्जला-दिभिः, 'आभ्यन्तरं' सकलसत्त्वानुग्रहबुद्ध्या। 'वाग्यमः' मौनव्रतं। 'व्रतचारिता' ब्रह्मचारिता* ॥ ३० ॥

किञ्च सर्व्वेन्द्रियेति। 'सर्व्वेन्द्रियसमाहारः' विषयेभ्यः सर्व्वेषां इन्द्रि-याणां प्रत्याहरणं। अयञ्च योगशास्त्रे प्रत्याहार इत्युक्तः। 'धारणा' इति। तल्लक्षणमाह तत्रैव। प्रदेशे धार्य्यते वायुर्मनो वापि सुसंयुतं। स्वधारकप्रयत्नेन धारणा साऽभिधीयते। 'ध्यानं' चिन्तनं। तच्च द्वि-विधं काम्यफलार्थं मोक्षफलार्थञ्चेति। तत्र मोक्षफलार्थं नित्यं। तस्य 'अभ्यासः' तत्परता 'भावशुद्धिः' प्राणिषु अद्रोहबुद्धिः। 'एष परि-व्राड्धर्म्म उच्यते' ॥ ३१ ॥

वर्णाश्रमाणामसाधारणधर्म्ममभिधाय साधारणमभिधातुमाह। अहिंसेति। वर्णिभिराश्रमिभिश्च परकीयाणां मानदारद्रव्यादीनां 'अहिंसा' कर्त्तव्येति शेषः। 'सूनृतं' प्रियं पथ्यञ्च सूनृतं इत्येवंभूता वाणी, सर्व्वेषु वक्तव्येति भावः। 'सत्यं' अमृषावादः। 'शौचं' बाह्या-भ्यन्तरशौचं श्रुतिस्मृतिविहितं, 'दया' दीनानुकम्पनं, 'क्षमा' क्षान्तिः। स्पष्टमन्यत् ॥ ३२ ॥

स्वधर्म्मानुष्ठाने फलमभिधातुमाह। स्वर्गेति। 'स्वर्गानन्त्याय' स्वर्गस्य आनन्त्यं मोक्षस्य स्वर्गानन्त्यं तस्मै प्रभवतीति। 'धर्म्मोऽयं' अन्तरोक्तः। 'सर्व्वेषां वर्णिलिङ्गानां' भवतीति शेषः। 'तस्य' धर्म्मस्य 'अभावे' विनाशे अननुष्ठाने 'अयं लोकः' 'शङ्करात्' सङ्कीर्णतया 'नाश आप्नुयात्' ॥ ॥ ३३ ॥

धर्म्मप्रवर्त्तकदण्डधराभावे दोषं दर्शयन्नाह। सर्व्वस्यास्येति। 'सर्व्व-स्यास्य' धर्म्मस्य 'यथान्यायं' स्मार्त्तन्यायमनतिक्रम्य 'भूपतिः' विजिगीषुः 'सम्प्रवर्त्तकः' सम्प्रवर्त्तयिता। 'तस्य' भूपतेः 'अभावे' 'धर्म्मनाशः' दण्डाभावात् धर्म्मनाशे 'जगच्च्युतिः' जगतो विनाशः स्यात् ॥ ३४ ॥

---

* वाङ्मनो ब्रह्मचारितेति मु०।

वर्णाश्रमधर्मप्रभावमेवाभिधातुमाह । वर्णाश्रमाचारेति । 'वर्णाश्रमाचारयुक्तः' तदाचारतत्परः, 'वर्णाश्रमविभागवित्' इति वा कस्य प्रतिपत्तिरिति जानाति । 'पाता' रक्षिता वर्णाश्रमाणां 'पार्थिवः सर्वलोकभाक्' । शक्रलोकभाग् इति टीकासम्मतः पाठः । शक्रलोकः स्वर्गः ॥ ३५ ॥

॥ इति वर्णाश्रमधर्मः ॥

दण्डमाहात्म्यमभिधातुमाह । इति यस्मादिति । *'आत्मवान्' अभिहितात्मसम्पद्गुणयुक्तः 'सम्यक्' विजितेन्द्रियो 'नृपः' न केवलं आत्मनः प्रजानाञ्च 'उभौ लोकौ धारयति' दण्डप्रणयनात् इत्यर्थः । 'दण्डीव' यम इव रागद्वेषरहितो दण्डं धारयेत् ॥ ३६ ॥

दण्डधारणप्रकारमभिधातुमाह । उद्वेजयतीति । 'तीक्ष्णेण' अन्यायादधिकेन दण्डेन, प्रजाः 'उद्वेजयति' । मृदुना न्यूनेन 'परिभूयते' न भवत्यस्य दण्डे पीड़ेति दण्डाद्भयं नास्तीति परिभूयते । 'दण्डेन' अन्यूनाधिकेन द्वेषः परिभवो वा भवति यस्मात् तस्मात् 'युक्तदण्डः प्रशस्यते' सुविज्ञातप्रणयनादित्यर्थः ॥ ३७ ॥

तदेव दृढ़यति । त्रिवर्गमिति । 'त्रिवर्गं' धर्मार्थकामान्, 'वर्द्धयति', 'आशु' सत्वरं 'राज्ञो दण्डः यथाविधि' सुविज्ञातप्रणीतत्वात् । 'आसामञ्जस्यात्' समञ्जसभावो सामञ्जस्यं माध्यस्थं, रागद्वेषाभ्यां तदभावो आसामञ्जस्यं तस्मात् आसामञ्जस्यात् 'प्रणीतः' दुष्प्रणीतो दण्डः 'वनस्थानपि' लोकव्यवहारबाह्यानपि 'कोपयेत्' ॥ ३८ ॥

किञ्च लोकेति । 'लोकशास्त्रानुगः' लोकः वर्णाश्रमादिजनपदः, शास्त्रं श्रुतिस्मृत्यादि । 'तदनुगतः' तदनुरूपो दण्डः नेयः दण्ड्यं प्रति विधेयः । उभयानुगतत्वात् सुतरां अनुद्वेजनो भवति । विजिगीषोः श्रिये च भवति । उत्तरार्द्धं स्पष्टं ॥ ३९ ॥

महीपतेर्जगतश्च ध्वंसकारणमभिधातुमाह । परस्परेति । 'पर-

---

* आत्मत इति मु० ।

स्पराभिषतया' भक्ष्यभक्षकत्वेन स्थितस्य 'जगतः'। भिन्नवर्त्मनः 'पृथ-
ग्मार्गस्य दण्डस्येत्यर्थः। 'दण्डाभावे परिध्वंसी मात्स्यन्यायः प्रवर्त्तेत'
इति स्पष्टं ॥ ४० ॥

एतदेव दृढ़यितुमाह। जगदेतदिति। स्पष्टं ॥ ४१ ॥

एतमर्थमुपसंहरन्नाह। इदमिति। 'इदं' जगत् 'प्रकृत्या' स्वभा-
वेन 'विषयैः' स्पर्शादिभिः, 'वशीकृतं' विषयीकृतं, आहारनिद्रा-
भयमैथुनादीनां शरीरेष्वेव सहोत्पद्यमानत्वात्। अतएव 'परस्परं'
'परस्परस्त्रीधनलोलुपं' तत्तल्लम्पटं 'जगत्' केवलं दण्डभयेन उपपीड़ितं
सत् 'साधुसेविते' मुमुक्षुभिरध्यासिते 'सनातने' नित्ये पुण्ये वा स्वर्गा-
नन्त्यगामिनि मार्गे प्रस्थानं करोति ॥ ४२ ॥

एतदेव दृढ़यन्नाह। नियतेति। 'अस्मिन्' जगति 'साधुवृत्तः' पर-
वशः' 'दुर्लभः' दुष्प्रापः किन्तु दण्डयोगात् सर्व एव प्रायशो नियत-
विषयवर्त्ती भवति। यथा कुलस्त्री विरागहेतुभूतकृशत्वविकलत्वा-
दिदोषदुष्टं पतिं शास्त्रोक्तदण्डभयेनैव पतित्वेनाङ्गीकरोति ॥ ४३ ॥

दण्डप्रणयनेऽपि विजिगीषोः प्रयोजनमाह। इति परिगणितार्थ
इति। 'इति' एवमुक्तप्रकारेण, 'परिगणिता' निर्णीताः 'अर्था' वधा-
दिदण्डस्य दोषा गुणाश्च येन सः। अतएव *शास्त्रमार्गानुसारी।
'नियमयति' एवं वर्त्तितव्यमिति नियमं करोति। 'यतात्मा' जिते-
न्द्रियः। प्राप्ता मार्गेषु प्रचारो याभिस्ताः 'प्राप्तमार्गचाराः' 'सरितः
समुद्रं' इव 'अपुनरपगमाय' अपुनर्निवृत्तये, 'सम्पदः' लक्ष्म्यः 'तं'
राजानं 'विशन्ति' ॥ ४४ ॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां
द्वितीयः सर्गः ॥ ० ॥

---

* प्राप्तमार्गेति मु०।

आचारव्यवस्थापनम्।

सदाचारस्थानमभिधातुमनन्तरसर्गेण सम्बन्धं दर्शयन्नाह। दण्डमिति। 'दण्डीव' धर्मराज इव। 'भूतेषु' वर्णाश्रमेषु। 'धारयन्' तुलया धृतमिव, न्यूनाधिकत्वाभावात्। 'प्रजापतिरिव' कारणिकसृष्टेरनन्तरं विनयापादनेन प्रजापतिर्यथा प्रजानां स्थितिमकल्पयत् तद्वत् विजिगीषुः, इति, स्पष्टमन्यत् ॥ १ ॥

दण्डो दण्ड्येष्विवानुग्रहोऽनुग्राह्येष्विति दर्शयन्नाह। वाक् सूनृतेति। 'सूनृता' सत्या प्रिया वाणी। 'दानं' प्रकृते आपन्नत्राणार्थं। 'दीनाः' परैः पीड्यमानाः, 'उपागताः' शरणमागताः, तद्रक्षणं,साधुसङ्गश्च,'इति' एतत् 'साधु' उत्तमतरं, 'सतां व्रतं', उभयलोकसाधकत्वात् हितं॥२॥

अपरश्च 'आविष्टः' इति दुःखमापन्न इव मन्यमानः। अन्यत् स्पष्टं॥३॥

एतदेव द्रढयितुमाह। न तेभ्य इति। 'तेभ्योऽधिकाः' अन्ये 'न सन्ति'। शेषं सुगमं॥ ४ ॥

भूयोऽपि दीनोद्धरणप्रकारमाह। दयामिति। 'परमां' निर्व्याजां। 'धर्मात्' क्षत्रधर्मात्, 'अविचलन्नृपः' शत्रुविषये दाहलोपादिके कर्त्तव्ये। यदि दयया तन्न करोति तदा विजिगीषुर्धर्माच्चलितो भवति। एवं दयालुता विषयभेदेन कर्त्तव्येति भावः। 'पीड़ितानां', चौरादिभिः। 'अनाथानां' त्राणसमर्थनारहितानां। शेषं स्पष्टं॥ ५ ॥

वर्णाश्रमसाधारणोऽप्ययं धर्म आदरप्रदर्शनार्थं पुनरुच्यते। आनृशंस्यमिति। नृशंसो हिंस्रः तद्विपरीतः अनृशंसः तस्य भावः 'आनृशंस्यं' दयालुत्वं। 'परः' उत्कृष्टः। 'सर्वप्राणभृतां मतः' सर्वानुमतः। यत इति पाठान्तरः। यत एवं तस्मात् राजा 'आनृशंस्येन', 'कृपणं' दीनं, 'जनं', 'पालयेत्', नतु सबलमित्यर्थः॥ ६॥

कृपणपीड़ने दोषमाह। न हीति। यथा कश्चित् व्याध्याद्युपशमेन 'सुखमन्विच्छन्', मनुष्य उपहारं देवताभ्यः प्रयच्छति। इत्येवंप्रकारैरन्यैरपि कारणैः 'कृपणं', जनं 'हि' स्फुटं, 'न पीड़-

येत्'। 'मन्युना' पीड़ाजनिताक्रोशशोकरुदितेन। शेषं स्पष्टं ॥ ७ ॥

अपरञ्च। को हि नामेति। 'कोनाम' जनः, 'कुले' विशुद्धे, 'जातः' उत्पन्नः सन्, 'सुखलेशेन लोभितः' यत्किञ्चित् सुखास्वादप्रलोभितः, 'अल्पसाराणि' दुर्बलानि, 'भूतानि' प्राणिनः, 'पीड़येत्', 'अविचारयन्' दीर्घविचारमकृत्वैव। यस्तु पीड़येत् स कुलीनो न भवतीति भावः ॥ ८ ॥

एतदेव द्रढ़यितुमाह। आधीति। ''आधयः' मनःपीड़ाः, 'व्याधयः' जराद्याः तैः 'परीताय' समन्ताद्व्याप्ताय, एवञ्च 'अद्य श्वोवा विनाशिने' निःसंशयं विनश्वराय, 'कोहि नाम' विवेकी, 'शरीराय' शरीरसुखसम्पादनार्थं, 'धर्मापेतं' अधर्मिष्ठं, 'समाचरेत्' अविवेकित्वादाचरेदित्यर्थः ॥ ९ ॥

भूयोऽपि अकार्यनिषेधाय वैराग्यं दर्शयन्नाह। आहार्यैरिति। 'आहार्यैः' असहजैः सुगन्धानुलेपनवस्त्रालङ्कारादिभिः, स्वभावादहृद्यं पूतिगन्धसुखखेदाद्युपेतं, 'त्वर्गा दुःखेन हृद्यतां नीयमानं', 'हि' स्फुटं, 'छायामात्रकमेव' छायामात्रावस्थिति, न चिरस्थायीत्यर्थः। अतः 'इदं' शरीरं *'नश्येदुदकबिम्बवत्, साक्षादेवादर्शनं यातीत्यर्थः ॥ १० ॥

विषयाणामसारत्वं दर्शयन्नाह। महावातेति। 'महावातः' महाश्मादि मेघमालावत् 'अतिपेलवैः' कोमलैः, 'विषयारिभिः' विषयस्पर्शादय एवाहितकारित्वात् शत्रवस्तैः, 'महात्मानः' विवेकिनोऽपि, 'कथं नाम', 'क्रियन्ते' वशीक्रियन्ते ॥ ११ ॥

भूयोऽप्यनित्यतां दर्शयन्नाह। जलान्तश्चन्द्रेति। जलमध्यगतचन्द्रप्रतिविम्बवत् प्राणिनां चञ्चलं जीवितं 'तथाविधं ज्ञात्वा', 'शश्वत्' अनवरतं, 'कल्याणं' तद्धेतुत्वात् धर्मम्, 'आचरेत्' ॥ १२ ॥

एतदेव द्रढ़यितुमाह। जगन्मृगेति। 'जगत्' विश्वं, 'मृगतृष्णातुल्यं' मृगतृष्णिकोपमानं, ''वीक्ष्य' दृष्ट्वा, 'इदं' दृश्यमानं, 'क्षणभङ्गुरं' आशु

---

* पश्येदुदकबिम्बुवदिति सु०।

विनाशि, '*सुजनैः' सत्पुरुषैः, विद्यावृद्धैरित्यर्थः । '†सङ्गतं' साहित्यं, 'कुर्यात्', धर्मार्थं सुखार्थञ्च ॥ १३ ॥

सुजनसङ्गतिं प्रशंसन्नाह । सेव्यमानस्त्विति । सुधातत्त्व इवेति । श्लोकद्वयं स्पष्टं ॥ १४ ॥ १५ ॥

सुजनसङ्गतस्य फलं प्रदर्श्य दुर्जनसङ्गतं निन्दन्नाह । ग्रीष्मे इति । ग्रीष्मे सूर्यांशवोऽतितीक्ष्णा भवन्ति तैः सम्यक् तप्तं, अतएवोद्वेजनं 'अनाश्रयं', वीरुल्लताद्यभावात् 'मरुस्थलमिव', दुर्जनसङ्गतेश्चाश्रयो नास्तीति स्थितेरभावात् 'उदग्रं' उच्चं, मरुपक्षे तदतीवोष्णग्राहि भवतीति दुर्जनैः सम्बन्धं त्यजेत् । कौटल्येनाप्युक्तं 'अनार्यजनसंसर्गं त्यजेत्' इति ॥ १६ ॥

दुर्जनस्वरूपमाह । ‡श्रुतशीलोपसम्पन्नानिति । श्रुतं आन्वीक्षिक्यादिविद्या, शीलं सत्स्वभावता, ताभ्यामुपसम्पन्नान् 'श्रुतशीलोपसम्पन्नान्', 'अकस्मादेव' कारणं विनापि, 'अन्तः प्रविश्य' विश्वासदर्शनादात्मभावं गत्वा हृदयं प्रविश्य, 'शुष्कवृक्षमिवानलः',§ 'दहति', स्पष्टं ॥ १७ ॥

आशीविषेभ्योऽप्यधिकदुष्टतां दुर्जनस्य दर्शयन्नाह । निश्वासोद्गीर्णेति । निश्वासेन उद्गीर्णो यो विषकृतभुक् विषानलस्तस्य धूमेन धूम्रीकृतानि आननानि येषां तैः 'आशीविषैः' सर्पैः सह, 'सङ्गं वरं कुर्यात्', किन्तु 'दुर्जनैः', समं निश्चितं 'न कुर्यात्' । सर्पाः कथञ्चिदुपकाररहिता न व्यभिचरन्ति, दुर्जनास्तु व्यभिचरन्त्येवेति भावः ॥ १८ ॥

उपकारिष्वपि अपकारी दुर्जन इति दर्शयन्नाह । दीयत इति । 'स्वच्छहृदयैः' अकलुषितचित्तैः सुजनैः, 'पिण्डः' शुभाहारमयः, 'येनैव पाणिना दीयते', 'मार्जार इव दुर्वृत्तः', 'तमेव' पाणिं, 'विलुम्पति', दौष्ट्यात्, स्पष्टं ॥ १९ ॥

अपरञ्च । असाध्यमिति । 'साधुमन्त्राणां' पञ्चाङ्गानां, 'असाध्यं'

---

* स्वजनैरिति मु० । ‡ सतः शीलेत्यादीति मु० ।
† 'सङ्गतः' इति मु० । § शुष्कदृचानिति मु० ।

अप्रतिविधेयं, 'तीव्रं, तीक्ष्णं, 'वाग्विषं' वाक्स्वरूपं विषं, 'उत्सृजन्' उद्गिरन्, 'दुष्टो दुर्जनपन्नगो द्विजिह्वं वदनं धत्ते' स्पष्टं। दौष्ट्यादेवं-विधो दुर्जनपन्नगः सुदूरतः परित्याज्य इति भावः॥ २०॥

प्रसङ्गादागते दुर्जने विधेयमाह। क्रियत इति। 'अभ्यर्हणीयाय' पूज्याय सुजनाय, 'यथाऽञ्जलिः क्रियते' प्रश्रयप्रदर्शनार्थं 'ततः' तस्मा-दपि, 'साधुतरः' स प्रश्रयविशेषः 'दुर्जनाय कार्यो हितार्थिना', प्रती-तमन्यत्॥ २१॥

आराधनादुपकारबुद्धिरप्यस्य भवतु इति जनानुरागार्थमस्य सद्य-वहारविशेषमभिधातुमाह। ह्लादिनीमिति। 'सम्यक्' सूक्तत्वेन, 'जनजिहीर्षया' जनचित्तापहारार्थं, सर्वत्र 'परमां मैत्रीं भावयन्', अर्थात् दुर्जनः, 'सर्वसत्त्वानां ह्लादिनीं सर्वानन्दकारिकां 'लौकिकीं गिरं' लोकव्यवहारिकां वाचं, 'उत्सृजेत्' दद्यादित्यर्थः॥॥ २२॥

दुष्टवाक्ये दोषं दर्शयन्नाह। नित्यमिति। हृदि विद्धमिति। स्पष्टं॥ २३॥ २४॥

क्रूरवचसां स्वरूपमभिधातुमाह। तीव्राणीति। 'तीव्राणि' दुःस-हानि, 'उद्वेगकारीणि' उद्वेजनीयानि, 'अनयात्मकैर्विरूढानि' दु-र्नीतिशालिभिरुदीरितानि, 'वचांसि' दुर्वाक्यानि, 'शस्त्राणीव देहि-नां मर्म्म कृन्तति', स्पष्टं॥ २५॥

प्रियवचसां गुणं दर्शयन्नाह। प्रियमेवेति 'प्रियमेव' श्रुतिसुखमेव, 'अभिधातव्यं' प्रयोक्तव्यं, 'सत्सु' सुहृत्सु, 'नित्यं द्विषत्सु च' सततं द्वेष्टृषु च। 'केकामधुरः शिखीव' कलनादरमणीयो मयूर इव, 'प्रिय-वाक्' मिष्टभाषी जनः, 'कस्य न प्रियः', अपितु सर्वस्यापीत्यर्थः॥ २६॥

अपिच। अलङ्क्रियन्ते इति। 'मदरक्तया' कलस्वनजनितमदरक्त-या, 'विपश्चितः' पण्डिता विवेकिनः, 'अत्यर्थं' निरतिशयं, 'माधुर्यगुण-युक्तया' मधुरया, 'वाचा'। अन्यत् स्पष्टं। मधुरवागेव विपश्चितोऽ-लङ्करणमिति भावः॥ २७॥

अपरञ्च। मदरक्तस्येति। गुणानुरागीति। ये प्रियाणीति। प्रतीतं ॥ २८ ॥ २९ ॥ ३० ॥

गृहस्थाचारमभिधातुमाह। शुचिरिति। 'शुचिः' बाह्याभ्यन्तरशौचयुक्तः, बाह्यं मृज्जलादिभिः, आभ्यन्तरं सर्वसत्त्वानुग्रहबुद्ध्या। वेदोक्तं समग्रमपि मन्यते यः स आस्तिकः तस्य भाव आस्तिक्यं तेन पूत आत्मा यस्य सः 'आस्तिक्यपूतात्मा'। अवशिष्टं सुगमं ॥ ३१ ॥

उक्तपूजनक्रममभिधातुमाह। प्रणिपातेनेति। 'गुरून्'आचार्यादीन्, 'प्रणिपातेन' प्रणिपत्य, 'अभिमुखान् कुर्वीत' इत्यनुवर्त्तते। 'सतः' सत्पुरुषान्, 'अनूचानचेष्टितैः' विनीतभावैः। 'देवान्', 'सुकृतकर्मणा' पुण्येनानुष्ठानेन, 'भूत्यै' सम्पदर्थं। देवाः सुकृतेनाभिमुखा भवन्ति न प्रणाममात्रेण ॥ ३२ ॥

अपरञ्च। स्वभावेनेति। 'स्वभावेन' परमात्मीयभावेन, 'मित्रं' मित्रतामुपगतं, 'सद्भावेन' साधुभावेन, 'बान्धवान्' आत्मबन्धुप्रभृतीन्, 'स्त्रीभृत्यं' भार्यानुजीविवर्गं, 'प्रेमदानाभ्यां' दानरहितेन स्नेहेन प्रेमविवर्जितेन दानेन च, 'दाक्षिण्येन' स्निग्धभावेन, 'इतरं' उक्तव्यतिरिक्तं जनं, 'हरेत्' आराधयेत् ॥ ३३ ॥

दानक्रममभिधातुमाह। * गुणानुरागीति। 'गुणानुरागी' पात्रगुणेष्वनुरागवान्, अनेकगुणवद्भ्य एव धनं विसृजेन्नान्यथेति, 'स्थितिमान्' यस्य यावत् प्रतिज्ञातं तदनतिक्रमेण निर्वहणं स्थितिस्तद्युक्तः। 'श्रद्दधानः' दानात् नूनं पुण्यमस्तीति श्रद्धान्वितः, 'दयान्वितः' दीनानाथेष्वपि कारुण्यात् प्रवृत्तदानः, अवशिष्टं स्पष्टं ॥ ॥ ३३ क्रोडः ॥

प्रियवाक्सहितमेव दानं कर्त्तव्यमित्यस्यैवार्थस्य प्रशंसामभिधातु-

---

* गुणानुरागी स्थितिमान् श्रद्दधानो दयान्वितः।
धनं धर्माय विसृजेत् प्रियां वाचमुदीरयन् ॥ ३३ क्रोडः ॥

माह । *ये प्रियाणीति । 'ये' श्रीमन्तः, प्रियञ्च भाषन्ते 'प्रयच्छन्ति च' 'सत्कृतिं' सत्कारं, 'ते वन्द्यचरिताः', 'नरविग्रहाः' मनुष्यशरीराः, 'देवाः', एवेति ॥ ३३ क्रोडः ॥

एतदेव द्रढ़यितुमाह । अनिन्देति । 'परकृत्येषु' परानुष्ठानेषु, विभिन्नदर्शनेष्वपि, 'अनिन्दा' निन्दा न कार्या, 'स्वधर्मपरिपालनं' शास्त्रोक्तस्य स्वधर्मस्यानुष्ठानं, 'कृपणेषु दयालुत्वं' अनाथादिषु अनुकम्पापरत्वं, 'सर्वत्र' सर्वस्मिन् जने, 'मधुरा गिरः', नियमात् वाच्या इति शेषः ॥ ३४ ॥

किञ्च प्राणैरपीति । 'अव्यभिचारिणो' अकपटाय, 'गृहागते परिष्वङ्गः' गृहागतेऽरावपि आशु सम्भाषणं, 'शक्त्या दानं' यथाशक्ति दानं, 'सहिष्णुता' सहनशीलत्वं ॥ ३५ ॥

अपरञ्च । बन्धुभिरिति । स्वजनबन्धुप्रभृतीनां 'चित्तानुविधायित्वं' चित्तानुवर्त्तनं, 'महात्मनां वृत्तं', इत्यर्थः ॥ ३६ ॥

एतदनुष्ठानफलमभिधातुमाह । सनातने इति । 'महात्मनां', नित्ये मार्गे 'साधु', 'तिष्ठतां', 'गृहमेधिनां', 'अयम्',एव 'पन्थाः', सम्मतः । 'नियतम्', 'अनेन' पथा, 'गच्छन्', लोकद्वयं प्राप्नोतीत्यर्थः ॥ ३७ ॥

किञ्च । उक्तपथानुसारिणो नरपतेर्विनयगुणेन जगत् आयत्तं भवेत् इत्यर्थः ॥ ३८ ॥

अपरञ्च । क्वचेति । मधुरवचनान्येव पाशास्तैरायतः 'लालितः' आदावायतः पश्चादालालितः सुरक्षितः सन्, 'लोकः' 'संस्थितेः' न्यायमार्गावस्थितेः, 'भेदं' व्यभिचारं, 'न एति' नागच्छति । न्याय्यदण्डः सामसहायः कार्यसाधको भवतीति भावः ॥ ३९ ॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां तृतीयः सर्गः ॥ ✻ ॥

---

† ये प्रियाणि प्रभाषन्ते प्रयच्छन्ति च सत्कृतिं ।
श्रीमन्तो वन्द्यचरिता देवास्ते नरविग्रहाः ॥ ३४ क्रोडः ॥

श्लोकाविमौ मु० पु० न स्तः ।

वर्णाश्रमस्थापनानन्तरं राज्यप्रकृतीनां समानामपि गुणसमूहकृतां सम्पदं दर्शयितुं प्रकृतिरेव तावदाह। स्वाम्यमात्येति। 'स्वाम्यमात्यौ' उक्तलक्षणौ, 'राष्ट्रं' जनपदः, 'दुर्गं' स्थानीयादि, 'कोषः' रत्नसारादिः, 'बलं' चतुरङ्गं, 'सुहृत्' मित्रं,। 'परस्परोपकारीदं' इति स्वामी अमात्यस्य उत्पादकत्वेन उपकारी, अमात्योऽपि स्वामिनो बुद्ध्यादिसाहाय्येन। तौ राष्ट्रस्य रक्षादिनोपकारकौ, राष्ट्रं कोषादिसम्पादनेन तयोः, दुर्गं रक्षाविधानादिना तेषां, तेऽपि संस्कारादिसम्पादनेन दुर्गस्य, कोषो कृत्युपकरणसम्पादनेन तेषां, वर्द्धनरक्षणतीर्थप्रतिपादनादिना तेऽपि कोषस्य, बलं चतुरङ्गं असाध्यसाधनोपकारि पूर्व्वोक्तानां, तेऽपि भरणादिना बलस्य, मित्रं सहायादिना अनन्तरोक्तानां, तेऽपि तथैव च मित्रस्येति। इदं परस्परोपकारि सप्ताङ्गं राज्यं॥ १॥

एतदेव समर्थयन्नाह। एकाङ्गेनापीति। 'एकेनाप्यङ्गेन', 'विकलं', शरीरमिव 'एतत्' राज्यं, 'साधु', यथा स्यात्तथा 'न वर्त्तते'। तस्मात् 'सामग्र्यं' सम्पूर्णतां, 'अन्विच्छन्', *'आशु', 'परीक्षणं', कस्य के गुणाः समग्रा असमग्रा वा इति परीक्षामपि कुर्वीत इति भावः॥ २॥

आत्मसम्पदं समर्थयन्नाह। †लोकाधारा इति। लोकानामाधारस्वरूपाः दुष्प्राप्याः 'दुष्परिग्रहाः', 'आपः संस्कृते आधारे इव 'राज्ञां श्रियः संस्कृते आत्मनि तिष्ठन्ति'। नान्यथेति आत्मसम्पदादिगुणैः आत्मा संस्कार्य इति॥ ३॥

स्वामिना आत्मगुणसम्पत् सम्पादनमेव प्रथमं विधेयमिति दर्शयन्नाह। आत्मानमेवेति। अमात्यादिप्रकृतिभ्यः 'आत्मानं' शरीरमेव, 'गुणसमन्वितं' वक्ष्यमाणगुणोपेतं, 'इच्छेत्'। 'गुणसंयुक्तः'

* सुपरीक्षणमिति मु०।
† अयं श्लोकः मु० पु० पञ्चमस्थानीयः।

लब्धात्मलाभः। 'ततः' अनन्तरं, 'शेषपरीक्षणं' अवशिष्टप्रकृतीनां परीक्षणं 'कुर्वीत' ॥ ४ ॥

गुणसम्पत्सम्पादनार्थमित्येतावदेव समर्थयन्नाह। साधु भूतलदेवत्वमिति। 'साधु' शोभनतरं, 'भूतलदेवत्वं' परमैश्वर्यादिकं कार्यं, किन्तु 'अकृतात्मभिर्दुष्करं', शेषाद्धं स्पष्टं ॥ ५ ॥

श्लोकत्रयेण आभिगामिकगुणानभिधातुमाह। कुलमिति। 'कुलं' उभयकुलविशुद्धिराभिजात्यं, 'सत्त्वं' व्यसनेऽभ्युदये चाविकारता, 'वयः' यौवनं, 'शीलं' सुस्वभावता, 'दाक्षिण्यं' सर्वत्र सानुकम्पत्वं, 'क्षिप्रकारिता' अदीर्घसूत्रत्वं, '*अविसंवादिता' वाक्छलेन विरुद्धसंवादरहितत्वं, 'सत्यं' अमृषावादः, 'वृद्धसेवा' विद्यावृद्धाराधनतत्परता, 'कृतज्ञता' कृतस्य प्रत्युपकारतत्परता। 'दैवसम्पन्नता' यद्यदिच्छति तत् सम्पद्यत यस्य स दैवसम्पन्नस्तस्य भावः, 'बुद्धिः' अष्टगुणा प्रज्ञा, 'अक्षुद्रपरिवारता'† अक्षुद्रजनपरिजनत्वं, 'शक्यसामन्तता' शक्या वशे कर्तुं सामन्ताः संसक्तमण्डलमर्यादा भूम्यन्तरा अरयो यस्य तद्भावः, 'दृढभक्तिता' स्थिरानुरागत्वं, प्रतिपन्ननिर्व्यूढिरित्यर्थः। 'दीर्घदर्शित्वं' दीर्घदेशेन दीर्घकालेन च व्यवहितं प्रज्ञाचक्षुषा द्रष्टुं शीलं यस्य तद्भावः, 'उत्साहः' शौर्यादिगुणसंयुक्तता, 'शुचिता' परदारादिनिरीहा, स्थूललक्ष्यता, स्थूललक्ष्यादिभ्यः स्थूलमेव लक्ष्यं सद्भ्यादिभिः करोति न कृशं स्वल्पं इत्यर्थः, 'विनीतता' विनयः, 'धार्मिकता' धर्मनिष्ठता, एते 'गुणाः', 'साध्याभिगामिकाः', संश्रयणीयत्वकारकाः, अनायासेन बहुभिराश्रिता भवन्तीत्यर्थः ॥ ६ ॥ ७ ॥ ८ ॥

एतदेव दर्शयितुमाह। गुणैरिति। 'गुणैः', एतैः' अनन्तरोक्तैः, 'सुव्यक्तं' निश्चयेन, 'अभिगम्यते', परिजनैरित्यर्थः। एवम्भूतैः परिजनैरभिगतो राजा नान्यथा। शेषार्द्धं सुगमं ॥ ९ ॥

---

* असंविवादिता इति मु०।

† अक्षुद्रपरिचारिता इति मु०।

राज्ञा परिवार एवंविधः कार्यो नान्यथा इति दर्शयन्नाह । प्रख्यात-वंशमिति । 'प्रख्यातवंशः' विख्यातसोमसूर्यादिवंशस्तं, 'अक्रूरं' अहिंस्रं, 'लोकसङ्ग्राहिणं' स्वजनादपरलोकसङ्ग्रहणशीलं, 'शुचिं' अपांसुलं अन्य-स्नेहनं च, एवम्भूतं 'परिवारं कुर्वीत महीपतिः' । 'आत्महिताकाङ्क्षी', यस्तु विपरीतं करोति स नात्मनो हित इति ॥ १० ॥

परिवारे गुणं दोषञ्च दर्शयन्नाह । दुष्टोऽपीति । 'दुष्टोऽपि नृपः' गृध्र इव, 'भोग्यतां' आश्रयतां, 'एति' प्राप्नोति, हंससमैः 'परिवार-गुणैः' । नृपो दुष्टपरिवारस्तु गृध्रपरिवार इव हंससमोऽपि 'व्याला-क्रान्तो द्रुम इव' आशीविषपरिवेष्टितचन्दनद्रुम इव भोग्यतां 'नैति', तस्मात् सुपरिवारः स्यात् ॥ ११ ॥

एतदेव समर्थयन्नाह । निरुन्धाना इति । 'सतां' सत्पुरुषाणां वि-जिगीषुमभिगच्छतां, 'मार्गं', सेवान्तरद्वारैः, 'निरुन्धानाः', 'दुष्टात्मानः' दुष्टाः, 'सचिवाः', प्रतिबन्धकत्वेन 'भक्षयन्ति महीपतिं' उत्पादकसत्पु-रुषशून्यं महीपतेः समुदायं कोशं भक्षयन्ति । समुदायभक्षणात् महीपतिरुपचारात् भक्षितो भवति । यतो दुष्टात्मानः सचिवाः कर्मा-मात्या न योग्याः, 'तस्मात्', 'सुसचिवः' विशुद्धचित्तकामात्यः, 'भवेत्', इत्यर्थः ॥ १२ ॥

सतां मार्गनिरोधे कुसचिवकृते विभूतेर्नैष्फल्यं दर्शयन्नाह । विभू-तीरिति । 'परमाः' उत्कृष्टाः, 'विभूतीः' विभवान्, 'प्राप्य', 'सतां' साधूनां, 'सम्भोग्यतां' सम्भोगविषयतां, * 'नयेत्' प्रापयेत् । 'यासु' विभूतिषु, 'सन्तः' साधवः, 'न तिष्ठन्ति', उपभोक्तुं 'ता विभूतयः', 'वृथैव' निष्फला एव ॥ १३ ॥

साधुधने साधुसम्भोगं व्यतिरेकमुखेन दर्शयन्नाह । असद्भिरिति । 'किम्पाकवृक्षस्य' महाकालवृक्षस्य, 'फलं,'† 'ध्माङ्क्षाः'‡ काकाः । स्पष्टमन्यत् ॥ १४ ॥

---

* व्रजेदिति मु० पु० । † माकालफल इति यस्य भाषायां प्रसिद्धिः ।
‡ ध्वाङ्क्षा इति मु० ।

स्वामिप्रकृतिसम्बन्धिनां आभिगामिकगुणानां स्वरूपं गुणैरुत्कृष्टतामभिगच्छताञ्च कर्मसन्धिवादीनाञ्च प्रसङ्गात् स्वरूपमभिधाय प्रस्तुतामात्मसम्पदमभिधातुमाह। वाग्मीति। 'वाग्मी' प्रशस्तवाक्, 'प्रगल्भः' सुरसदृशस्यापि विगृह्य वक्तीत्यर्थः। 'स्मृतिमान्' वर्षशतेऽपि श्रुतदृष्टस्मारकः, 'उदग्रः' उद्गताग्रः, प्रांशुरित्यर्थः। 'बलवान्' कायबलसम्पन्नो वृकोदरवत्, 'वशी' जितेन्द्रियः, 'नेता' प्रणेता, 'दण्डस्य' बधपरिक्लेशादिकस्य, अतएव 'निपुणं',* यथा भवति तथा, 'कृतशिल्पः' कृताखिलकलः, 'स्ववग्रहः'† सुखेनैवानीतिप्रवृत्तोऽवगृह्यते निषिध्यते इति॥ १५॥

किञ्च। पराभियोगेति। 'पराभियोगप्रसहः' शत्रुकृतविग्रहसहिष्णुः, ‡'सर्वदृष्टप्रतिक्रियः' सर्वापायेषु दृष्टाः प्रतिक्रिया येन स तथा। 'परच्छिद्रान्ववेक्षी'§ शत्रुदोषान्वेषणशीलः, 'सन्धिविग्रहतत्त्ववित्' षाड्गुण्यप्रयोगवित्॥ १६॥

अपरञ्च। गूढमन्त्रेति। 'गूढमन्त्रप्रचारः' गूढोऽतिगुप्तः मन्त्रः पञ्चाङ्गः कर्मणामारम्भोपायः पुरुषद्रव्यसम्पत् देशकालविभागः विनिपातप्रतीकारः कार्यसिद्धिश्चेत्येवंलक्षणो यस्य सः, तथा गूढप्रचारोऽन्यैरविदितप्रचारः परेषामसाध्यः स्यात्। 'देशकालविभागवित्' युद्धाय संस्थानादिर्देशः, कालश्चायमस्माकं अनुकूलः शत्रोश्च प्रतिकूल इति विभागं जानाति। 'आदाता सम्यगर्थानां', प्रजादिभ्यः शास्त्रोक्तन्यायेन, तथा 'विनियोक्ता', सह्ययकरणेन, 'पात्रवित्', अर्थविनियोगे पुरुषार्थत्रयाभिसन्धिना। पात्राणि त्रिविधानि, धर्माभिसन्धिना ब्राह्मणतपस्विक्षपणकादयः, अर्थाभिसन्धिना मन्त्रिपुरोहिताद्यर्थोत्पादकाः, कामाभिसन्धिना मनोरमा स्त्रियः इत्येवं गुणविभागेन पात्राणि वेत्तीति॥ १७॥

---

* निपुणः इति मु०। † सुविग्रहः इति मु०।
‡ दृष्टसर्वप्रतिक्रियः मु० पु०। § परच्छिद्रानुपेक्षीति मु०।

अपरञ्च, क्रोधेति। स्पष्टं ॥ १८ ॥

किञ्च। वृद्धोपदेशेति। 'वृद्धोपदेशसम्पन्नः' वृद्धोपदेशानुष्ठानज-नितसम्पत्तियुक्तः। 'शक्तः' उत्साहशक्तिभिः समर्थः। *मधुरदर्शनः' रमणीयाकृतिः। 'गुणानुरागी' गुणवत्सु स्नेहानुरागः, 'स्मितवाक्' ईषद्धसितोपलक्षितवाक्, एवम्प्रायविंशतिगुणपरिकल्पिता विजि-गीषोः 'आत्मसम्पत्', 'प्रकीर्त्तिता' ॥ १९ ॥

आत्मसम्पदो माहात्म्यं दर्शयन्नाह। इत्यादिगुणेति। 'इत्यादि-गुणसम्पन्ने', 'लोकयात्राविदि' लौकिकव्यवहारज्ञे, 'स्थिरे' अचपले, 'निर्वृत्तः', निर्वाणसकलोपतापविच्छेपात् 'पितरीव' जनके इव, 'आस्ते' स्थितिं करोति पुत्र इव, 'लोकः' जनपदः, 'स पार्थिवः', नान्य इति॥२०॥

अमुमेवार्थं द्रढयन्नाह। आत्मसम्पदिति। स्पष्टं ॥ २१ ॥

आभिगामिकगुणमध्ये पठिताया बुद्धेरुत्साहस्य च गुणान्तरमभि-धातुमाह। शुश्रूषेति। 'शुश्रूषा' जन्मान्तरवासनया विद्यासु श्रोतु-मिच्छा। ततः 'श्रवणं'। 'ग्रहणं' श्रुतकमेणैव व्याख्यातस्यादानं। 'धा-रणं' अवधारणं, 'ऊहः' वितर्कः किमिदमेवंविधमन्यथा चेति सन्देहः। 'अपोहः' विचार्य असद्भूतस्य परित्यागः। 'अर्थविज्ञानं' अर्थेषु वि-विधं ज्ञानं सदसद्रूपं। 'तत्त्वज्ञानं' तत्त्वं परमार्थः तत्र ज्ञानं अभिनि-वेशः, एते धियो गुणाः ॥ २२ ॥

उत्साहगुणानभिधातुमाह। दाक्ष्यमिति। 'दाक्ष्यं' कौशलं, 'शैघ्र्यं'* क्षिप्रकारिता, 'अमर्षः' अपकारिणां कथमप्यविस्मरणं, 'शौर्यं' अभी-रुत्वं एतत् 'उत्साहलक्षणं' अनेन उत्साहो लक्ष्यत इति। 'गुणैः' आभिगामिकैः आत्मसम्पदुक्तैः अनन्तरोक्तबुद्ध्युत्साहगुणैः, 'उपेतः' अन्वितः, 'राजा भवितुमर्हति', महाराजत्वयुक्तो भवतीत्यर्थः ॥ २३ ॥

एतेषां मध्ये गुणत्रयस्य प्राधान्यं दर्शयन्नाह। त्याग इति। 'त्यागः' वदान्यतालक्षणः, 'सत्यं च' 'शौर्यञ्च' यथोक्तलक्षणं। 'एते त्रयः',

* शैघ्र्यमिति सु॰ पु॰।

'महागुणाः', महाफलसम्पादकत्वात् । उत्तरार्द्धं स्पष्टं । यत्सर्वं कर्त्तव्यं तदेतत् गुणचयमेव सम्पादयतीत्यर्थः ॥ २४ ॥

स्वामिगुणसम्पादनमभिधायामात्यगुणसम्पादनमभिधातुममात्यपुरोहितादीनां यथासम्भवं गुणानाह । कुलीना इति । 'कुलीनाः' शुद्धोभयकुलसमुत्पन्नाः । 'शुचयः' स्वभावतः शौचपराः, 'शूराः' अभीरवः, 'श्रुतवन्तः' आन्वीक्षिक्यादिश्रुतशालिनः, 'अनुरागिणः' स्वाम्यनुरागवन्तः, *'दण्डनीतेः प्रयोक्तारः' अर्थशास्त्रप्रयोगकुशलाः । 'सचिवाः' सह विचिन्वन्ति स्वामिना सहार्थान् इति सचिवाः अमात्याः स्युः, 'महीपतेः', विजिगीषोरिति ॥ २५ ॥

अमात्यादीनां शुचीनामपि उपधाशोधनं सूचयन्नाह । †उपधाशोधिता इति । उपधाश्चतस्रः, धर्मोपधा, अर्थोपधा, कामोपधा, भयोपधा च । सभया ह्ययमकर्मण्यो राजा, अन्योपादनेन धर्ममुपपादयाम इति प्रत्याख्याने शुचिरिति धर्मोपधा । अभव्योऽयं राजा एनं हत्वा आत्मीयवर्गायाभिलषितार्थं प्रयच्छाम इति तत्प्रत्याख्याने शुचिरिति अर्थोपधा । राजमहिषीं कामयमानामुपगच्छाम इति प्रत्याख्याने शुचिरिति कामोपधा । एकोऽमात्यः सचिवानन्यानावाह्य एकैकं भयप्रदर्शनेन राजवधार्थमुपनयेदिति तत्प्रत्याख्याने शुचिरिति भयोपधा । ताभिः शोधिताः 'उपधाशोधिताः' । 'सम्यग् गाहमानाः फलोदयं', 'तस्य' स्वामिनः, 'सर्वं' कार्यजातं, 'कृताकृतं' किं कृतं किं वा न कृतं, इति 'सानुरागाः' अनुरागयुक्ताः, 'परीक्षेरन्' निरूपयेयुः ॥ २६ ॥

उपधाशब्दनिर्वचनमभिधातुमाह । उपेत्येति । 'उप' समीपं, 'इत्य', 'धीयते' आधीयते ढौक्यते, 'यस्मात्', 'ततः' तस्मात्, 'उपधा इति स्मृता', 'उपायाः' उपजापप्रयोगाः, 'उपधा ज्ञेयाः', 'तयाऽमात्यान् परीक्षयेत्', स्पष्टं ॥ २७ ॥

---

* दण्डनीतिप्रयोक्तार इति मु० पु० ।　　† उपधाः शोधिताः इति मु० ।

अमात्यानां गुणसम्पदमभिधाय मन्त्रिसम्पदमभिधातुमाह। स्वव-ग्रह इति। अमार्गप्रवृत्तममात्यमवग्रह्णन्ति प्रभविष्णुतया विहत्य निवारयन्ति ये बन्धुप्रभृतयस्तेऽवग्रहाः शोभनतया अवग्रहा यस्यासौ 'स्ववग्रहः', 'जानपदः' जनपदभवो विजिगीषुः स्वजन्मभूमिवात्सल्यात् तद्विरुद्धं न समाचरति। 'कुलशीलबलान्वितः' आभिजात्यसुखभावकायबलसम्पन्नः, 'वाग्मी' प्रशस्तवाक्, सारभाषीत्यर्थः। 'प्रगल्भः' अप्रतिद्वन्द्विकः, 'चक्षुष्मान्' शास्त्रमेव प्रशस्तं चक्षुस्तद्वान्, 'उत्साही' उक्तत्रिगुणात्मकोत्साहयुक्तः। 'प्रतिपत्तिमान्' प्रतिपत्तिः उत्पन्नप्रतिभा तया युक्तः॥ २८॥

अपरञ्च। स्तम्भेति। 'स्तम्भः' स्तब्धता, 'चापलं' अप्रतिष्ठितत्वं, ताभ्यां 'हीनः'। 'मैत्रः' मित्रावहितः। क्षुत्पिपासादिक्लेशं सहते इति 'क्लेशसहः', 'शुचिः' पूर्वोक्तचतुरुपधाशुद्धः। 'सत्यं' अमृषावादः, 'सत्त्वं' व्यसनेऽभ्युदये चाविकारित्वं, 'धृतिः' अविषण्णता, 'स्थैर्यं' स्थितेरविचलत्वं, 'प्रभावः' प्रभुता, 'आरोग्यं' नीरोगता, एतैर्युक्तः॥ २९॥

किञ्च। कृतशिल्पश्चेति। 'कृतशिल्पः' अभ्यस्तकलाकलापः, 'दक्षः' क्षिप्रकारी, 'प्रज्ञावान्' उक्ताष्टगुणबुद्धियुक्तः, 'धारणान्वितः' अविस्मरणयुक्तः, 'दृढभक्तिः' अचलानुरागः, 'अकर्त्ता च वैराणां' स्वामिकृतवैराणामप्रतिविधाता, एवम्भूतः 'सचिवो' भवेत्॥ ३०॥

अन्यानपि मन्त्रिगुणानाह। स्मृतिरिति। धारणान्वित इत्युक्तोऽपि स्मृतिगुणः पुनरुच्यते आदरप्रदर्शनार्थं। 'तत्परतार्थेषु' अर्थेषु रत्नादिषु अतितात्पर्यं, 'वितर्कः' बुद्धिगुणमध्ये पठितोऽप्यत्र पुनरुच्यते आदरार्थं। 'मन्त्रगुप्तिः' पञ्चाङ्गमन्त्रगोपनं, अन्यत् सुगमं॥ ३१॥

अमात्यादधिकतरगुणं पुरोहितमभिधातुमाह। त्रय्यामिति। 'शान्तिकपौष्टिकं' स्वस्त्ययनादिकं। अवशिष्टं सुगमं॥ ३२॥

प्रसङ्गात् गणकगुणमभिधातुमाह। ताद्यगिति। स्पष्टं॥ ३३॥

अमात्यसाधुताप्रभृतीनां गुणानां व्यक्तिविशेषेभ्यः प्रत्यक्षतः परि-

ख्यानमाह श्लोकषट्केन। साधुतेति। स्वजनेभ्य इति। गुणद्वयमिति। उत्साहश्चेति। भक्तिमिति। अलुब्धतामिति ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ॥ ३८ ॥ ३९ ॥

प्रत्यक्षप्रमाणेन परीक्षामुक्त्वाऽनुमानेनापि अभिधातुमाह। कर्मानुमेया इति। 'परोक्षगुणवृत्तयः' परोक्षा अप्रत्यक्षा गुणस्य रामणीयकादिकस्य वृत्तयः निष्पत्तयः, 'कर्मानुमेयाः', भवन्ति यतः, 'तस्मात्', 'परोक्षवृत्तीनां' कर्मणां 'फलैः' निष्पत्तिलक्षणैः,'कर्म' अनिष्पन्नलक्षणं, 'विभाव्यते' *उपलक्ष्यते, अनुमीयत इत्यर्थः ॥ ४० ॥

मन्त्रिणां स्वामिनश्च विधेयमाह। सज्जमानमिति। 'अकार्य्येषु' शास्त्रनिषिद्धत्वात् व्यसनादिषु, 'सज्जमानं' आसक्तिं यान्तं, 'निरुन्ध्युः' प्रतिषेधयेयुः आक्रम्य, 'मन्त्रिणो नृपं' इति स्पष्टं, 'गुरुणामिव' इहलोकपरलोकदायिजनकाचार्य्यादीनामिव, 'एतेषां' मन्त्रिणां, 'वचनं' हितवचनं, 'शृणुयात्', श्रवणमचानुष्ठानपर्य्यन्तं ग्राह्यं 'नृपः' स्वामी ॥ ॥ ४१ ॥

जगतो विनाशाभ्युदययोर्नरेश्वरविनाशाभ्युदयौ भवत इति दर्शयन्नाह। नरेश्वर इति। 'नरेश्वरे' विजिगीषा, 'निमीलति' विनश्यति सति, 'जगत्सर्वं' मात्स्यन्यायात् निमीलति। 'सूर्य्योदयेऽम्भोजं यथा' सूर्य्योदये पद्ममिव, 'तत्प्रबोधे' नरेश्वरस्याभ्युदये,'प्रबुध्यते' ज[illegible]र्त्ति, जगदित्यर्थः ॥ ४२ ॥

मन्त्रिणः श्रितस्य च कर्त्तव्यमाह। तद्बोधयेदिति। 'तत्'† तस्मात्, 'जगन्नाथं' भुवनेश्वरं, 'बोधयेत्' व्युत्पादयेत्, अमात्यादिः। 'सः' स्वामी, पुनः 'यथा' येन प्रकारेण, 'बुध्येत' पञ्चतन्त्रकथादिभिरपि, 'धीसत्त्वोद्योगसम्पन्नैः‡ श्रितैः' सेवकैः पुरुषैः तत्, 'तथा' कार्य्यं ॥ ४३ ॥

जगन्नाथबोधकमन्त्रिणां प्रशंसामभिधातुमाह। नृपस्येति। 'नृपस्य,

---

* विभावयेदिति मु०। † तं इति मु०।

‡ सत्कर्मसु समाहितैः इति मु०।

स्वामिनः, 'ते' मन्त्र्यादयः, 'हि' यस्मात्, 'सुहृदः' बान्धवाः। 'त एव गुरवः' अभ्यर्हिततरा आचार्य्याः, 'मताः' शास्त्रकारिभिः सम्मताः। उत्तरार्द्धं सुगमं ॥ ४४ ॥

एतदेव द्रढयितुमाह। सज्जमानमिति। 'अकार्य्येषु' निषिद्धाचरणादिषु, 'सज्जमानं' आसक्तिं यान्तं नृपं, 'ये सुहृदः' येऽनुरक्तहृदयाः 'वारयन्ति,' 'ते सत्यं नैव सुहृदः', 'गुरवः' महान्तः, 'गुरवः' आचार्य्याः, 'हि' किल, भवन्ति ॥ ४५ ॥

कथमकार्य्येषु सक्तो भवतीत्याह। कृतविद्योऽपीति। 'कृतविद्योऽपि' जनः, 'बलिना' अतिबलवता, 'रागेण' विषयानुरागेण, 'व्यक्तं' स्फुटतरं, 'रज्यते' तन्मयो भवति। 'रागानुरक्तचित्तस्तु' रागोपरक्तचित्तः पुनः, 'किं', नाम, 'असाम्प्रतं' अयुक्तं कर्म्म, 'न कुर्य्यात्' अपि तु सर्व्वमेव ॥ ४६ ॥

किञ्च। पश्यन्नपीति। 'पश्यन्नपि' लोचनाभ्यां सूर्य्यादिकमवलोकयन्नपि, 'भवत्यन्धः', लोकद्वयविरुद्धकार्य्याणामदर्शनात् 'सुहृद्वैद्याः' सुहृद एव वैद्याः, 'निर्म्मलैर्विनयाञ्जनैः' पवित्रैराधिहारिभिर्विनयरूपाञ्जनैर्नेत्ररोगौषधैः, 'चिकित्सन्ति', स्पष्टमन्यत् ॥ ४७ ॥

एतदेव समर्थयन्नाह। रागमानमदान्धस्येति। 'रागमानमदैरन्धस्य', 'शत्रुसङ्कटे' शत्रुकृतायामापदि, 'स्खलतः' पततः, सुहृदादिचेष्टितं 'हस्तावलम्बो भवति'। पतितो यथा हस्तावलम्बेन धार्य्यते तद्वत् स्वामी स्खलन् मन्त्रिचेष्टितेन धार्य्यते इत्यर्थः ॥ ४८ ॥

ये तु स्वामिनः स्खलितानुपेक्षन्ते तेषां दोषं दर्शयन्नाह। मदोद्धतस्येति। 'मदेन' मत्ततया, 'उद्धतस्य' उन्मार्गप्रवृत्तस्य, 'अन्यायप्रवृत्तस्य' शास्त्रोक्तवृत्तरहितस्य, 'नृपतेः' विजिगीषोः, 'सङ्कीर्णस्य दन्तिन इव' उच्छृङ्खलस्य हस्तिन इव, 'नेतारः' मन्त्र्यादयः, 'वाच्यतां' निन्द्यतां, 'खलु' निश्चयेन, 'गच्छन्ति' प्राप्नुवन्ति ॥ ४९ ॥

स्वामिप्रकृतेरमात्यप्रकृतेश्च गुणानभिधाय राष्ट्रप्रकृतेर्गुणेष्वभिधेयेषु

भूमिर्जनपदश्चेति द्विधावस्थिताया राष्ट्रप्रकृतेरन्तर्भूताया भूमेरेताव-द्गुणसम्पन्नायाः सामर्थ्यं दर्शयन्नाह । भूगुणैरिति । 'भूगुणैः' वक्ष्यमाण-लक्षणैः, 'राष्ट्रं' जनपदः, 'वर्द्धते' । 'तद्वृद्धिर्नृपवृद्धये' राष्ट्रवृद्ध्या कोषवृद्धिः, कोषवृद्ध्या दण्डवृद्धिः, तद्वृद्ध्या मण्डलान्तरग्रहणात् सुतरां नृपस्य वृद्धिरिति । 'तस्मात् गुणवतीं भूमिम्' इत्यादि, प्रतीतं ॥ ५० ॥

भूमिगुणानेवाभिधातुमाह, शस्याकरवतीति । 'शस्यानि' प्रायः-क्षणानि, 'आकराः' सुवर्णाद्युत्पत्तिस्थानानि, तद्विशिष्टा । 'पण्यानि' कुङ्कुमागुरुजीरकादीनि, 'खनयः' चर्मणिमुक्ताद्युत्पत्तिस्थानानि, 'द्र-व्याणि' दुर्गाद्युपयोगिसारवृक्षवनानि, तैः 'अन्विता', 'गोहिता' क्षीर-वृद्धिविधायिनी । 'भूरिसलिला' प्रचुरजला, 'पुण्यैः' धार्मिकैः, 'जान-पदैः' वर्णाश्रमिभिः, युता ॥ ५१ ॥

किञ्च, रम्येति । 'रम्या' रमणीया, 'सकुञ्जरवना' हस्तिवनोपेता । 'वारिस्थलपथान्विता', स्पष्टं । 'अदेवमातृका' पर्ज्जन्य एव मातृका यस्याः सा देवमातृका पर्ज्जन्यसस्येत्यर्थः । तद्विपरीता, भूरिसलिलत्वेन सरि-त्सरःसहस्रसङ्कुलत्वेन अपर्ज्जन्यसस्येत्यर्थः । 'इति' एवं प्रकारा, 'भूर्वि-भूतये', भवतीति शेषः ॥ ५२ ॥

भूदोषानभिधातुमाह । *शर्करेति । 'शर्कराः' प्रस्तरशकलानि. 'ऊषरः' क्षारमृत्तिका, 'पाषाणाः' शिलासमूहाः, तैर्युता । 'साट-तात्स्थ्यादाटविकैर्युक्ता, 'नित्यतस्करा' प्रतिरोधकादिभिरविरहिता, 'रूक्षा' अस्निग्धा । अन्यत् स्पष्टं ॥ ५३ ॥

जनपदगुणानभिधातुमाह, स्वाजीव्य इति । 'स्वाजीव्यः' सुखमाजी-व्यते, 'भूगुणैर्युक्तः' अनन्तरोक्तैर्भूगुणैर्युक्तः । '†सानूप.' सजलभू-मियुक्तः, नानाशस्यप्रभवत्वात् । 'पर्वताश्रय.' तृणकाष्ठादिसौकर्य-सम्पादनात् । 'शूद्रकारुवणिक्प्रायः', विधेयत्वात् यथेष्टभोग्यः । अन्यत् स्पष्टं ॥ ५४ ॥

---

* सशर्करा सपाषाणा इति मु० । † सानूपः इति मु० ।

किञ्च, सानुराग इति। 'सानुरागः' स्वामिन्यनुरक्तः, 'रिपुद्वेषी' स्वामिशत्रौ द्वेषवान्, 'पीडाकरसहः' कोशाल्पत्वदोषरूपा पीडा, तत्परिहाराय अधिकमपि करं सहते यः, 'पृथुः' विस्तीर्णः, 'नानादेश्यैः समाकीर्णः' नानादेशीयवाणिज्यकारिभिर्व्याप्तः। 'धार्मिकः' पुण्यप्राचुर्यकरः, धर्मषष्ठांशप्रदानेनोपकरोतीत्यर्थः। 'पशुमान्' क्षीरघृतादिभिरुपकरोतीति, 'धनी' दण्डकरादिभिरुपकरोतीत्यर्थः ॥ ५५ ॥

अपरञ्च, ईदृगिति। 'मूर्खव्यसनिनायकः' मूर्खा बुद्धिरहिता व्यसनिनो विषयासक्ता नायका मुख्या यस्यासौ। अयं अभिसन्धानपरो न भवति, अभिसन्धातुञ्च न शक्यते, 'तं' तादृशं जनपदं, 'वर्द्धयेत्', 'तस्मात्' जनपदात्, 'सर्वं' सर्वाङ्गमपि राज्यं, 'वर्द्धते' वृद्धिं याति ॥ ५६ ॥

राष्ट्रप्रकृतेर्गुणसम्पदमभिधाय दुर्गप्रकृतिमभिधातुमाह। पृथुसीमेति। 'पृथुसीम' विस्तीर्णमुखभूमि, 'महाखातं' महापरिखं, 'उच्चप्राकारगोपुरं' उच्चप्राचीरवत् पुरद्वारं यस्य तं, 'शैलसरिन्मरुवनाश्रयं*' पार्वतौदकमारववानदुर्गाणामन्यतमदुर्गाश्रयं, 'पुरं', 'समावसेत्', स्पष्टं ॥ ५७ ॥

किञ्च, जलवदिति। 'जलवत्' प्रचुरजलं, 'धान्यधनवत्' धान्यादिशस्यसुवर्णादिरत्नसम्पन्नं, 'दुर्गं', 'कालसहं', निचयसम्पन्नत्वात्। 'महत्' विस्तीर्णं। 'दुर्गहीनो नरपतिर्वाताभ्रावयवैः समः', एतादृशो नरपतिरलब्धावस्थितिर्भवतीत्यर्थः ॥ ५८ ॥

शैलसरिन्मरुवनदुर्गाश्रय इत्युक्तं तदेव व्याख्यातुमाह। औदकमिति। 'औदकं' प्रचुरोदकसम्पन्नं, 'पार्वतं' इति प्रान्तरं गुहा वा इति द्विधैवोक्तं 'वार्क्षं' वृक्षबहुलत्वात् अतिगहनं। एतदपि बहूदकसम्पन्नं, 'ऐरिणं' ऐरिणे निर्जले देशे भवं, 'धान्वनं' निस्तृणजलो देशो धन्वा तत्र भवं, धान्वनं, 'दुर्गं', 'दुर्गोपचिन्तकैः' दुर्गव्यवस्थापकैः, 'शास्त्रमतिभिः' शास्त्राभिज्ञैः, आचार्यैः, 'प्रशस्तं' अनुशिष्टं ॥ ५९ ॥

---

* शैलसरिद्वनवनाश्रयामिति मु० पु०।

दुर्गगुणानभिधातुमाह। जलेति। 'जलं', च 'अन्नं', च 'आयुधानि' धनुरादीनि च,'यन्त्राणि' सर्वतो भद्राणि च, तैः 'आढ्यं' सम्पन्नं, 'जलान्नायुधयन्त्राढ्यं', 'धीरयोधैरधिष्ठितं' धैर्यशालियोद्धपुरुषैः कृतरक्षं, 'गुप्तिप्रधानं' रक्षाबहुलं, 'आचार्याः' शुक्रसुरगुरुप्रभृतयः, 'समनुमेनिरे' एतादृशदुर्गविषये सम्यक् अनुमानं कृतवन्तः ॥ ६० ॥

किञ्च। सापसाराणीति। 'सापसाराणि' निरुद्धोऽपि पुत्रकलत्रादिः यत्रापसार्यते तादृशानि,'दुर्गाणि', तथा 'सानूपजाङ्गला भुवः' जलस्थलप्राया भूमयश्च, स्पष्टमन्यत् ॥ ६१ ॥

कोषप्रकृतेर्गुणसम्पदमभिधातुमाह। बह्विति। 'बह्वादानः' बहुसञ्चयः, 'अल्पनिस्रावः' अल्पव्ययः, 'ख्यातः' निःशेषविषयव्यवहारार्हः, 'पूजितदैवतः' पूजितानि श्रीधनदादीनि दैवतानि यस्मिन् सः, 'ईप्सितद्रव्यसम्पूर्णः' सुवर्णादीप्सितधनसम्पन्नः, 'हृद्यः' मनोरमः, महार्घालङ्कारसम्पन्नत्वात्। 'आप्तैरधिष्ठितः' आप्ताः विश्वस्तास्तैरधिष्ठितो रक्षितः ॥ ६२ ॥

एवंविधगुणः कोशः कोशज्ञानां सम्मत इति दर्शयन्नाह। मतेति। 'पितृपैतामहोचितः' पितुरपि पैतामह इति न्यायोपार्जितत्वात्, 'उचितः', च विजिगीषोर्धर्मार्जितत्वात्। 'व्ययसहः' व्ययं सह[illegible]यः, नैव क्षीयत इत्यर्थः। स्पष्टमन्यत् ॥ ६३ ॥

कोशविनियोगमभिधातुमाह। धर्महेतोरिति प्रतीतं ॥ ६४ ॥

श्लोकत्रयेण दण्डगुणमभिधातुमाह। पितृपैतामह इति। 'पितृपैतामहः' पित्रादिक्रमायातः। 'वश्यः'* विधेयः, 'संहतः' अविभिन्नः, 'दत्तवेतनः' कृतभरणः, 'विख्यातपौरुषोर्जस्कः'† प्रख्यातपुरुषत्वबलवत्त्वादि यस्य सः। 'कुशलः' सर्वायुधयुद्धकुशलः, 'कुशलैर्वृतः' आप्तैः निपुणैः अधिष्ठातृभिः परिवृतः अनुगतः ॥ ६५ ॥

---

* वंश्य इति मु०। † विख्यातपौरुषोर्जित्य इति मु०।

तथा 'नानाप्रहरणोपेतः' नानाविधधनुराद्यायुधयुक्तः। सुगम-मन्यत् ॥ ६६ ॥

तथा, 'प्रवासायासदुःखेषु', इत्यादि प्रतीतं। 'अद्वैधक्षत्रियप्रायः',* 'द्वैधं' द्विधाज्ञानं, तत् यस्य नास्ति सोऽद्वैधः अद्वैधः क्षत्रियप्रायः इति क्षत्रियाः स्वभावत एव महासत्त्वा भवन्तीत्यर्थः। 'दण्डः' चतुरङ्गबलं, स एवंविधः 'दण्डविदां' आचार्याणां, 'मतः' नान्यः ॥ ६७ ॥

मित्रप्रकृतेर्गुणसम्पदमभिधातुमाह। त्यागेति। 'त्यागविज्ञान-सत्त्वाढ्यं' लब्धत्वसर्वशास्त्रप्रवीणत्वाकुतोविकारित्वसम्पन्नं। 'महापक्षं' बहुबन्ध्वादिवर्गं। 'प्रियंवदं' प्रियहितवदनशीलं। 'आयतिक्षमं' आगामिकालेऽव्यभिचारि। 'अद्वैधं'† नेतरि शत्रौ च द्विधाभाव-रहितं। 'सत्कुलं' सति उभयपक्षेऽपि व्यभिचारो नास्ति, तत् कदा-चिदपि न व्यभिचरतीत्यर्थः। 'एवंविधं मित्रं कुर्वीत', इति स्पष्टं ॥ ६८ ॥

सत्कुलस्य गुणान् दर्शयन्नाह। कृच्छ्रेष्विति। 'कृच्छ्रेषु' दारुणेषु अप्रतिविधेयेषु, 'अच्छहृदयः' सुहृत्, 'कुलीनः' सत्कुलजातः, 'चतुर-स्रतां' एकरूप्यं, 'दर्शयति', स्पष्टं ॥ ६९ ॥

मित्रगुणं दर्शयन्नाह। पित्रिति। 'पितृपैतामहं' पित्रादिक्रमागतं, 'हृदयानुगं' मर्म्मज्ञं, 'महत्' महत्त्वगुणयुक्तं, 'लघुसमुत्थानं' आड-म्बरशून्यं, 'मित्रं इष्यते', विजिगीषुणेति शेषः ॥ ७० ॥

मित्राणि त्रिविधानि भवन्तीति दर्शयन्नाह। दूरादेवेति। 'दूरा-देवाभिगमनं' मित्रे समागते दूरादेवाभिमुखगमनं, 'स्पष्टार्थहृ-दयानुगा वाक्' एतादृशी वाक् वक्तव्या यस्या अर्थः स्पष्टो हृदया-नुगतश्च भवति। 'सत्कृत्यप्रदानं' देयवस्तूनां प्रदानं सत्कारपूर्वकं कार्यमिति। 'त्रिविधो मित्रसङ्ग्रहः' इत्यनेनानन्तरोक्तेन उपायत्रि-तयेन मित्राणि संगृह्यन्ते, मित्राणि भवन्तीत्यर्थः ॥ ७१ ॥

मित्रात् धर्मार्थकामरूपफलमभिधातुमाह। धर्मेति। स्पष्टं ॥ ७२ ॥

---

* अद्वैध्यक्षत्रियप्राय इति मु०। † अद्वैध्यमिति मु०।

मैत्रीस्वरूपमभिधातुमाह। आदाविति। 'सतां' साधूनां, 'मैत्र्यः' मित्रताः, 'सरित्समाः' नदीसमानाः। कथमित्याह, 'आदौ तन्व्यः', जलप्रदेशस्यादावल्पत्वात्, 'वृहन्मध्याः', मध्यप्रदेशे बहुजलत्वात्, 'विस्तारिण्यः पदे पदे' स्थाने स्थाने विस्तारयुताः, 'यायिन्यो न निवर्त्तन्ते' निवर्त्तनशीला अपि न निवर्त्तिन्यः, प्रतिपन्ननिर्वहणशीलत्वात्॥ ७३॥

कारणैरपि मित्रभेदानभिधातुमाह। औरसमिति। इत्थं कारणभेदेन मित्रं चतुर्विधं भवति, 'औरसं' सोदर्यकृतं स्निग्धं प्रथमं। 'कृतसम्बन्धं' सम्बन्धजनितं द्वितीयं। 'वंशक्रमागतं' पितृपैतामहमिति तृतीयं। 'व्यसनेभ्यः' आपद्भ्यः, 'रक्षितं', चतुर्थं॥ ७४॥

भूयोऽपि मित्रगुणानभिधातुमाह। शुचितेति। 'शुचिता', अर्थव्यये। 'त्यागिता' व्यवहारविषयेऽलुब्धत्वं। 'शौर्यं' विजिगीषोः सहायतादानेऽभीरुत्वं। 'समानसुखदुःखता' विजिगीषुणा सह सुखदुःखभागित्वं। 'अनुरागः', विजिगीषौ। 'दाक्ष्यं' विजिगीषुकार्यसम्पादकत्वं। स्पष्टमन्यत्॥ ७५॥

विस्तरेण मित्रसम्बन्धमभिधातुमाह। *तदर्थेहानुरागस्वेति। 'तदर्था' विजिगीषुनिमित्ता। 'ईहा', यत्किञ्चिदीहते तत् सर्वं विजिगीषुहितार्थमेवेत्यर्थः। 'अनुरागस्व' विजिगीषुहितसाधने। '[illegible]' एतत् गुणद्वयरूपं, 'मित्रलक्षणं', मित्रत्वे लिङ्गमित्यर्थः। अन्यत् स्पष्टं॥ ७६॥

उपसंहरन्नाह। इति स्वेति। 'इति' उक्तप्रकारेण, 'राज्यं सकलं' सप्ताङ्गं, 'समीरितं' व्याख्यातं। 'अस्य' राज्यस्य, 'परा' उत्कृष्टा, 'प्रतिष्ठा' स्थितिहेतुः, 'धनं' कोषः, 'ससाधनं' साधनं चतुरङ्गो दण्डः तेन सह वर्त्तमानं। 'गृहीतं' प्रतिगृहीतं, 'एतत्' राज्यं, 'नि-

---

* तदर्थे ह्यनुरागश्चेति मु०।

पुणेन मन्त्रिणा', 'त्रिवर्गनिष्पत्तिमुपैति', इति स्पष्टं, 'शाश्वतीं' अविनश्वरां ॥ ७७ ॥

यथाऽस्य राज्यस्य ससाधनं धनं परा प्रतिष्ठा स्यात्, निपुणेन मन्त्रिणा प्रतिगृहीतं च तत् त्रिवर्गमुपैति, तथैवान्तरात्मसमवेतस्वामिनाऽधिष्ठितं राज्यं तादृशफलकारि इति दर्शयन्नाह । यथान्तरात्मेति । 'अन्तरात्मा' प्रसिद्धः । 'समश्नुते' व्याप्य तिष्ठति, । पक्षे 'प्रकृतिः' स्वभावः, पक्षान्तरे अमात्यादिका । स्पष्टमन्यत् ॥ ७८ ॥

किञ्च, प्रकृतिभिरिति । उक्तगुणसम्पद्भिः 'प्रकृतिभिः' अमात्यादिकाभिः, 'सम्यगर्चितः' सम्पन्नः, 'जनपदं' राष्ट्रं 'आदरवान्' आदरी, 'पालयेत्' वर्द्धयेत् । 'जनपदपरिपालनात्', परमसमृद्धकोशदण्डः, 'परमं श्रियः पदं', 'चिरं' बहुकालं 'स्पृशति' 'एकच्छत्रं' पृथिवीपतित्वं प्राप्नोतीत्यर्थः ॥ ७९ ॥

एतदेव समर्थयन्नाह । प्रकृतिगुणसमन्वित इति । 'प्रकृतिगुणसमन्वितः' प्रकृतिगुणसम्पत्प्रकरणोक्तगुणैः कुलशीलादिभिरन्वितः । 'सुधीः' सुविज्ञः, 'नृपः', 'स्पृहणीयतां' आश्रयणीयतां, 'व्रजति' प्राप्नोति । अनन्तरं 'सः' नरपतिः, 'रणेषु' समरेषु, 'विद्विषां' शत्रूणां, 'प्रबल इव' प्रचण्ड इव, 'श्वसनः' महावातः, 'पयोमुचां' मेघानां । प्रचण्डपवनेन मेघा यथा खण्डशः क्रियन्ते, तथा प्रकृतिगुणसमन्वितेन राज्ञा शत्रव इत्यर्थः ॥ ८० ॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां प्रकृतिसम्पत्कथनं चतुर्थः सर्गः ॥ ४ ॥

अनन्तरं स्वामिनोऽनुजीविनाञ्च गुणसम्पदुक्ता, प्राधान्यात् तेषां पुनः कथनमिति दर्शयन्नाह। *वृत्तस्थमिति। 'वृत्तस्थं वृत्तिसम्पन्नं'। वृत्त-मनुष्ठानं, विजिगीषुवृत्तं पृथिवीपालनादिकं, तस्मिन् तिष्ठति स तं। 'वृत्तिसम्पन्नं' वृत्तिहेतुत्वात् कोशो वृत्तिस्तत्सम्पन्नस्तं। 'कल्पवृक्षोपमं' ईप्सितफलप्रदं, 'नृपं' स्वामिनं। 'अभिगम्यगुणैर्युक्तं' कुलशीलादिभिः पूर्वोक्ताभिगामिकगुणैः सम्पन्नं, 'अनुजीविनः' मन्त्रिप्रभृतयः 'सेवेरन्' सेवकत्वेन उपतिष्ठेरन् ॥ १ ॥

एतदेव दर्शयन्नाह। द्रव्यप्रकृतीति। 'द्रव्यप्रकृतिहीनोऽपि' कोश-प्रकृतिविहीनोऽपि। †'सेव्यः' स्वामी, 'सेव्यगुणान्वितः' आभिगा-मिकगुणयुक्तः। कस्मादित्याह। यस्मात् स्वामिनः 'कालान्तरादपि', 'श्लाघ्यं' स्पृहणीयतरं, 'आजीवनं' भरणं भवति ॥ २ ॥

असेव्यस्वामिनमभिधातुमाह। अपीति। 'पण्डितः' विवेकी, 'क्षुधा', 'परिगतः' शुष्यन्नपि, 'स्थाणुरिव' छिन्नशाखद्रुम इव, 'आसीत' तिष्ठेत् 'न त्वेव' न कदाचित्, 'अनात्मसम्पन्नात्' अनन्तरोक्तादात्मस-म्पद्गुणरहितात्, 'वृत्तिं' आजीवनं, 'ईहेत', ॥ ३ ॥

एतदेव दर्शयन्नाह। 'अनात्मवान्' इति स्पष्टं। नयं द्वेष्टुं शीलं यस्य सः 'नयद्वेषी'। 'वर्द्धयन्नरिसम्पदः' ‡अनात्मवत्तयैवारीणां सम्पदो वर्द्धयति। 'महदैश्वर्यं', 'प्राप्यापि' काकतालीयवत् प्राप्यापि, 'सह तेन विपद्यते' तेनैवैश्वर्येण सह विनश्यति, अतो नानात्मवान् सेव्य इति भावः ॥ ४ ॥

एतदेव समर्थयन्नाह। लब्धावकाश इति। 'लब्धावकाशः' प्राप्त-सेवावसरः, 'निपुणं' §यथा स्यात्तथा, 'अविकारवान्' स्वामिनि सर्वप्रकारविकाररहितः, 'स्थाने' सचिवादिपदे, 'स्थैर्यं' स्थिरत्वं,

---

* ईत्यर्थवृत्तिसम्पन्ना इति मु०। † सेव्यते सद्गुणान्वितः इति मु०।
‡ वर्धयन्नतिसम्पदः इति मु०। § निपुणः इति मु०।

'अवाप्नोति', बुद्धिसाध्येषु अनुष्ठानेषु, 'निश्चितः' कृतनिश्चयः। इति संक्षिप्तमिदमनुजीविवृत्तं ॥ ५ ॥

अनुजीविना नोभयलोकविरुद्धं आजीवमभिलषणीयमिति दर्शयन्नाह, आयत्यामिति। 'आयत्याम्' आगामिनि काले, 'तदात्वे च' वर्त्तमानकाले च, 'यदास्वादपेशलं' यत् आस्वादरमणीयं, 'तत्', क्लिश्यन्नपि क्षुधयेति शेषः। 'कुर्वीत', अर्थाधिकारी, 'न लोकद्विष्टमाचरेत्' न इहलोकविरुद्धमाचरेत् ॥ ६ ॥

कीदृशवान् कल्पवृक्षोऽपि अशुभात्मको म्लेच्छादिर्न सेव्यते इति दर्शयन्नाह। तिलास्वेति। 'तिलाः' शस्यविशेषाः, 'चम्पकपुष्पसंश्लेषात्' तिलमध्यन्यस्तनागचम्पकसम्पर्कात्, 'तदधिवासतां' तद्गन्धित्वं, 'प्राप्नुवन्ति',। ततश्च पीडितेषु तिलेषु चम्पकतैलं भवतीति संसर्गजोऽयं गुणः। 'रसो न भक्ष्यः', पुरुषैरिति शेषः। 'तद्गन्धः', रसो न भवति किन्तु गन्ध एवेति संसर्गजोऽयं दोषः। एवं 'सर्वे गुणाः' समस्ताः पुरुषधर्माः, 'साङ्क्रामिकाः' सङ्क्रमणशीलाः। तस्मादविशुद्धः सङ्गः परित्यज्य इति ॥ ७ ॥

एतदेव समर्थयन्नाह। अपामिति। 'अपां' जलानां, 'प्रवाहः' ओघः, *'गांग्योऽपि' अमृतमयोऽपि, 'समुद्रं' क्षारं, 'प्राप्य' गत्वा 'तद्रसः' क्षारः, 'भवति', 'अवश्यं' †निःसन्देहं, 'तत्' तस्मात्, 'विद्वान्' पण्डितो विवेकी, 'अशुभात्मकं' अकुलीनं म्लेच्छादिकं, 'नाश्रयेत्' न सेवेत, तत्सङ्गात् तत्सम एव भवतीति ॥ ८ ॥

तदेव दृढयितुमाह। क्लिश्यन्नपीति। 'क्लिश्यन्नपि' दौर्गत्येन बुभूक्षादिभिः क्लेशं गच्छन्नपि, 'शुद्धं' न्याय्यं, 'जीवनं' जीविकां, 'आचरेत्' आतिष्ठेत्। जीवनस्य शुद्धता यथोक्तसेवाधर्मादिगतत्वं। 'तेन' जीवनेन, 'इह' लोके, 'श्लाघ्यतां' स्पृहणीयतां, 'एति', 'लोकेभ्यश्च' इह परलोकबन्धुलोकेभ्यश्च, 'न हीयते' न च्यवते' ॥ ९ ॥

---

* गांगो वेति मु०। † अपेय इति मु०।

सेव्यस्वामिस्वरूपमभिधातुमाह। अभिलष्यमिति। 'अभिलष्यं', विन्ध्यपक्षे उन्नतिमत्त्वात्, 'ईश्वरपक्षे बहूनां मध्ये त्यागशौर्यादिभिर्लब्धकीर्त्तित्वात्। 'स्थिरं', विन्ध्यपक्षे स्वस्थानात्, ईश्वरपक्षे स्थितेः शास्त्रमर्यादाया अविचलत्वात्। 'पुण्यं', उभयतः पुण्ययोगात् महा[illegible]पन्नत्वाच्च। 'ख्यातं', उभयतो महत्त्वात् महामहिमत्वाच्च। 'साधुनिषेवितं' *साधुभिः सिद्धिमिच्छुभिः समधिष्ठितं। 'विन्ध्यमिवेश्वरं सेवेत', स्पष्टमन्यत्॥ १०॥

अभिमतगुणः स्वामी न प्राप्यते इत्याशङ्क्याह। दुरापमिति। 'दुरापमपि' दुष्प्रापमपि, 'अस्मिन्' जगति, 'यद्यदस्तु' धर्मार्थकाममोक्षादिकं, 'अभिवाञ्छति' अभिलषति, अर्थात् उद्यमी पुरुषः। 'मेधावी' प्राज्ञः, 'तत्तदाप्नोति', शिष्टं स्पष्टं॥ ११॥

आभिगामिकगुणोपेतस्वामिप्राप्त्यर्थं अनुजीविगुणानभिधातुमाह। आरिराधयिषुरिति। 'अनुजीवी' सेवकः, 'महीपतिं', 'सम्यक्' निरुपचरितत्वेन, 'आरिराधयिषुः' आराधयितुमिच्छुः सन्, '[illegible]विनयशिल्पाद्यैः' आन्वीक्षिक्यादिशास्त्रविद्येन्द्रियजयसकलकला[illegible]प्रभृतिभिर्गुणैः, 'आत्मानं' 'उपपादयेत्' सम्पन्नं कुर्यात्॥ १२॥

श्लोकद्वयेनैतदेव स्पष्टयन्नाह। कुलविद्येति। पूर्वार्द्धं स्पष्टं। 'वपुः' शरीरं, यथोक्तप्रमाणं, 'सत्त्वं' उक्तलक्षणं, 'बलं' महाप्राणता, 'आरोग्यं' रोगाभावः, 'स्थैर्यं' प्रतिष्ठितत्वं, 'शौचं' उपधाशुद्धि, 'दया' कारुण्यं, एभिर्गुणैः 'अन्वितः'॥ १३॥

किञ्च, 'पैशुन्यं' खलता, 'द्रोहः' विश्वासघातित्वं, 'सम्भेदः' संहतभेदनशीलता, 'शाठ्यं' नैकृत्यं, 'लौल्यं' आहारादिलोलुपत्वं, 'अनृतं' असत्यं, तानि अतिगच्छति तैः रहित इत्यर्थः। 'स्तम्भः' स्तब्धता, प्रश्रयराहित्यमित्यर्थः, 'चापलं' अप्रतिष्ठितत्वं, ताभ्यां हीनः। चकारादुक्तगुणैर्युक्तः सेवकदोषैर्विहीनश्च यः स 'सेवनं कर्तुमर्हति', स्पष्टं॥ १४॥

---

* सिद्धैर्निषेवितमिति मु॰।

अलङ्करणभूतान् सेवकगुणानभिधातुमाह। दृक्षतेति। 'दक्षता' कौशलं आशुकारित्वञ्च। 'भद्रता' भद्रकारित्वं, 'दार्ढ्यं' स्थिरस्नेहता, 'क्षान्तिः' क्षमा,'क्लेशसहिष्णुता' क्षुधाध्यादिबाधासहनशीलत्वं। 'सन्तोषः' अविषादिता, 'शीलं' सत्स्वभावः, 'उत्साहः' शौर्यामर्षदाक्ष्यलक्षणः, स्पष्टमन्यत्॥ १५॥

प्रधानतरं सेवकगुणं दर्शयन्नाह। अर्थेति। अर्थार्थी जीवलोकोऽयमित्यर्थशौचं दुष्करं, न चानेन विश्वासः स्यादित्याह, 'अर्थशौचपरः', इति, 'नृपं', 'विश्वासयेत्' स्वस्मिन् विश्वस्तं कुर्यात्, विश्वस्ता सेवा सम्पद्यत इति भावः। अवशिष्टं प्रतीतं॥ १६॥

अनुजीविवृत्तं सेवाधर्मविषयमभिधातुमाह। प्रविश्येति। 'प्रविश्य', प्रियहितद्वारेण राजसभां। 'सम्यगुचिते' प्रतीहारनिर्दिष्टे, 'स्थाने', 'तिष्ठन्', वक्ष्यमाणन्यायेन '*सुवेषवान्' निर्मलानुद्धतनेपथ्यवान्। 'विनयान्वितः' प्रश्रयवान्, स्पष्टमन्यत्॥ १७॥

तत्र सभायां यत् कर्तव्यं तदभिधातुमाह। परेति। 'परस्य' अन्यसेवकस्य, 'स्थानं' प्रदेशं, 'आसनं', च 'क्रौर्यं' क्रूरभावं, 'औद्धत्यं' असामान्यवेशत्वं, 'मत्सरं' विद्याशौर्याद्यसहनत्वं, 'ज्यायसा' अधिकेन सह, 'विगृह्य कथनञ्च' विरोधपूर्विकां कथां, 'न कुर्यात्', अनुजीवीत्यर्थः॥ १८॥

किञ्च, विप्रलम्भश्चेति। पूर्वार्द्धं स्पष्टं। 'पुत्रेभ्यः' स्वामिपुत्रेभ्यः, 'वल्लभेभ्यश्च' प्रियपार्श्वचरेभ्यः, 'नमस्कुर्यात्',। ते हि प्रश्रयेणाराधिताः स्वामिनमनुकूलं कुर्वन्तीति भावः॥ १९॥

अपरञ्च, न नर्मेति। 'नर्मसचिवाः' विदूषकामात्याः, यैः सह स्वामी नर्मालापं करोति, अवशिष्टं स्पष्टं॥ २०॥

अपरञ्च, भर्तुरिति। 'अन्वासने' समीपस्थाने, 'तिष्ठन्',। 'किं','अयं'

---

* सु वेषवान् इति मु०।

स्वामी, 'कुर्यात्', इति 'अस्यास्यं विलोकयन् तिष्ठेत्', स्पष्टमन्यत् ॥२१॥

किञ्च, क इति। स्वामिना 'कोऽत्र' इत्यादिष्टः 'अहं', अत्र तिष्ठामि 'इति', 'सम्यक् आज्ञापयेति च', ब्रूयात्। 'आज्ञां', दत्तां 'यथा[illegible]'* शक्त्यनतिक्रमेण, 'अविलम्बितं' सत्वरं, 'अवितथीकुर्यात्', य[illegible] करोमीति सत्यसम्पादनेनेत्यर्थः ॥ २२ ॥

किञ्च, उच्चैरिति। उच्चैः प्रहसनादिकं वर्जयेदिति प्रतीतं [illegible]३ ॥

भाषणावसरे यदभिलषितव्यं तदुपदेष्टुमाह। प्रविश्य सा[illegible]गस्येति। 'सानुरागस्य' अनुरागवतः, स्वामिनः 'चित्तज्ञसम्मतः' अ[illegible]षामपि चित्तज्ञानां सम्मतः, 'समर्थयंश्च तत्पक्षं' स्वामिपक्षं संस्थापयन्, 'भाषितः' पृष्टः सन्, 'साधु भाषेत', स्पष्टमन्यत् ॥ २४ ॥

पक्षान्तरमभिधातुमाह। तन्नियोगेनेति। 'तन्नियोगेन' स्वामिनियोगेन, 'अर्थं', वाक्यस्य, 'सुपरिनिश्चितं' सुनिर्णीतं, 'सुखप्रवृद्धगोष्ठीषु' सुखार्थं प्रवृद्धा या गोष्ठ्यः परिषदः तासु, 'विवादे', शास्त्रोक्तलक्षणे, 'वादिनां', मनीषिणामपि 'मतं' अभिप्रायं, च 'ब्रूयात्', ॥ ॥ २५ ॥

अभाषणीयमभिधातुमाह। विजानन्नपीति। 'भर्त्तुः छिन्नोत्तरं वचः' येन भर्त्ता निरुत्तरो भवति। 'प्रवीणोऽपि' भाषणे कुशलोऽपि, '[illegible]भिमानितां' स्वामिविषयिणीं। अभिमानात् न स्वामी निरुत्तरः [illegible]र्य इति भावः। स्पष्टमन्यत् ॥ २६ ॥

विद्याशिल्पविषये यन्न ब्रूयात् तदभिधातुमाह। यदप्युच्चैरिति। 'उच्चैः' अतिशयेन, 'यद्विजानीयात् तदपि नोच्चैः', 'कीर्त्तयेत्' किञ्चिदत्र जानामीति ब्रूयात्, 'कर्मणा' क्रियया, 'तस्य वैशिष्ट्यं कथयेत्', न वाचा तत्रापि 'विनयान्वितः' प्रश्रययुक्तः सन्, ज्ञानगर्वो न युक्त इति भावः ॥ २७ ॥

अपृष्टस्यापि कारणविशेषात् भाषणमभिधातुमाह। आपदीति।

---

* यथाशक्त्या इति मु०।

'आपदि' परप्रयुक्ततीक्ष्णादिप्रारब्धायां, 'उन्मार्गगमने' स्वामिनः शास्त्रविरुद्धाचरणे, 'कार्यकालात्ययेषु' स्वामिनः कार्याणामनुगुणकालातिक्रमेषु, 'च', स्पष्टमवशिष्टं ॥ २८ ॥

किञ्च, प्रियमिति। 'प्रियं' अभीष्टं, 'पथ्यं' हितं, 'तथ्यं' सत्यं, यत् भवेत् तत् 'धर्मार्थमेव वदेत्',। 'अश्रद्धेयं' श्रद्धातुमयोग्यं, '*असभ्यं' अश्लीलादि, 'परोक्षं', यदश्रद्धेयमिति सम्बन्धः। 'कटु' श्रुतिकटु, 'उत्सृजेत्, न ब्रूयादित्यर्थः, ॥ २९ ॥

किञ्च, परार्थमिति। प्रविश्य सानुरागस्य चित्तं चित्तज्ञसम्मत इत्यापद्यपि 'परार्थं', स्वामिनं विज्ञाप्य, 'स्वार्थं च साधयेत्', 'देशकालज्ञः' यस्मिन् देशे स्थितः स्वामी कार्यम् करोति यस्मिंश्च काले तौ जानाति इति तज्ज्ञः अनुजीवी, तत्र देशे काले चार्थं साधयेत्। स्पष्टमन्यत् ॥ ३० ॥

अपरञ्च, गुह्यमिति। 'गुह्यं' गोपनीयं, 'कर्म' शत्रुविषये आभिचारादिकं, 'मन्त्रञ्च', भर्तृसम्बन्धिनं 'न प्रकाशयेत्', तथा 'भर्तुर्विद्विष्टं' राज्यभ्रंशादिकं, 'विनाशं' मरणं, स्पष्टमन्यत् ॥ ३१ ॥

किञ्च, स्त्रीभिरिति। कामः शुद्धो न भवतीति शङ्कानिवृत्त्यर्थं 'स्त्रीभिः', तत्सङ्गागतपातकशङ्कानिवृत्त्यर्थं 'पापैः' पातकिभिः, अहितगत्यागमशङ्कानिवृत्त्यर्थं 'वैरिदूतैः', 'निराकृतैः' दोषात् स्वामिना दूरीकृतैः सह, 'एकार्थचर्यां' एकमर्थमुद्दिश्य सहचर्यां, 'साहित्यं' सङ्घातं, 'संसर्गं च' सर्वदा मिलित्वाऽवस्थानं, 'विवर्जयेत्' ॥ ३२ ॥

किञ्च, वेशेति। 'पृथिवीपतेः', 'वेशः' नेपथ्यादिः, 'भाषा' स्वामिना व्युत्पादिता, एतद्द्वयस्य 'अनुकरणं', 'न कुर्यात्', 'तद्गुणैः' राजगुणैः, 'सम्पन्नोऽपि', 'मेधावी' प्राज्ञो ऽनुजीवी, 'न च स्पर्द्धेत', तद्गुणैर्विद्धो राजाऽन्यथा भवतीत्यर्थः ॥ ३३ ॥

---

* असत्यमिति मु०।

किञ्च, रागेति। 'भर्त्तुः' स्वामिनः, 'रागः' अनुरक्तता, 'अपरागः' विरक्तता, तौ, 'जानीयात्', 'कुशलकर्मकृत्' अन्यैरपि कुशलैर्यत् कर्म-कृतं तत् कर्म करोति यः। नहि कर्मकरणाभावे रागापरागौ ज्ञातुं शक्येते। काभ्यां जानीयादित्याह, 'इङ्गिताकारलिङ्गाभ्यां' इङ्गते ज्ञायते हृदयस्थोऽर्थो येन तदिङ्गितं अन्यथावृत्तिः, पूर्ववृत्तायाः प्रसन्नादिकाया आकृतेरान्तरग्रहणं 'आकारः', तयोर्लिङ्गं चिह्नं ताभ्यां। 'इङ्गिताकारतत्त्ववित्', इति अनुजीविविशेषणं ॥ ३४ ॥

उक्तलिङ्गस्वरूपमभिधातुमाह। दृष्ट्वेति। 'दृष्ट्वा प्रसन्नो भवति', इति आकारलिङ्गं। 'वाक्यं गृह्णाति चादरात्', इति इङ्गितलिङ्गं। स्पष्टमन्यत् ॥ ३५ ॥

किञ्च, विविक्तेति। 'विविक्तदर्शनस्थाने' एकान्तदर्शने तादृशस्थाने च, 'रहस्ये' गोपनीये कार्ये, 'न शङ्कते', विश्वासयोगात्। 'तदर्थां' अनुजीविविषयिणीं, 'तत्कृतां' अनुजीविकृतां, 'सङ्कथामुच्चैराकर्ण-यति', ॥ ३६ ॥

किञ्च, श्लाघते इति। अन्येषु 'श्लाघनीयेषु' कीर्त्यमानेषु, स्वामी 'श्लाघते'। 'श्लाघ्यमानञ्च' अन्यैः कीर्त्यमानमनुजीविनं, 'नन्दति' अभि-नन्दति,। 'कथान्तरेषु', अन्यैः क्रियमाणेषु ईदृश एवासौ इति 'स्मरति'. यादृशोऽयं तादृशो नान्य इति 'प्रहृष्टः', 'गुणान्' तद्गुणान् 'कीर्त्तयेत्', इति स्पष्टं ॥ ३७ ॥

अपरञ्च, सहत इति। '*अपथ्यं' अहितं, '†उक्तोऽपि' अनु-जीविना 'सहते' समर्थयति, 'निन्दां', तत्कृतामपि 'नानुमन्यते', 'करोति वाक्यं', अनुजीविना 'प्रोक्तं,' 'तद्वचः' अनुजीविवचनं, 'बहु मन्यते', ॥ ३८ ॥

अनुरक्तस्य स्वामिनो लक्षणमुक्त्वा विरक्तस्य तदभिधातुमाह। उप-

---

* सहते पथ्यमिति मु०। † उक्तमिति मु०।

कारेष्विति । 'उपकारेषु अद्भुतेष्वपि', अनुजीविना कृतेषु, विरक्तत्वात् 'माध्यस्थ्यं', एव 'दर्शयति', स्पष्टं शेषार्द्धं ॥ ३९ ॥

किञ्च, विपक्षमिति । 'विपक्षं' शत्रुभूतं अनुजीविनं, 'उत्थापयति' उद्वेजयति, 'विनाशं च', विपक्षादिभिः क्रियमाणं 'उपेक्षते', । 'कार्ये', तत्साध्ये समुपस्थिते, 'संवर्द्धयत्याशां' कार्यनिष्पत्तौ सत्यां दारिद्र्यमोक्षं ते करिष्यामीत्याशां संवर्द्धयति । 'फले च', साधिते, 'कुरुतेऽन्यथा' त्वया नैतत् साधितमिति, ॥ ४० ॥

अपरञ्च, यद्वाक्यमिति । स्वामी अनुजीविविषये 'यत् किञ्चित् मधुरं वाक्यं', प्रयुङ्क्ते 'तदपि अर्थेन निष्ठुरं' यथा भद्र त्वया अहितैषिणा विपक्ष उपेक्षितो ममैव समग्रं यशो दातुं इति मधुरं भाषते, तदर्थस्तु विपक्षपक्षपाती भवान् इति । तथा 'आत्मशंसासु', अनुजीविना कृतासु, 'परीवादं' निन्दादिकं, 'केवलमाचरति', ॥ ४१ ॥

किञ्च, अकोपेऽपीति । मा किमप्ययमनुजीवी प्रार्थयतु इति 'अकोपोऽपि', 'सकोपाभः' कुपित इवाभाति । 'प्रसन्नः', केवलेन 'निष्फलः', '*भवति', 'अकस्मात् व्रजति', कस्मादयं मद्दृष्टिपथेऽवतिष्ठते इति स्पष्टमन्यत् ॥ ४२ ॥

अपरञ्च, आघट्टयतीति । †'मर्म्माणि' दुश्चरितानि, 'आ' समन्तात्, 'घट्टयति' स्पृशन्नेव वक्ति, '‡गुणान न बहुमन्यते' हासस्थानं अनुजीविप्रस्तावितं न मन्यते न हसतीत्यर्थः । 'सम्भावयति दोषेण' आत्मनो दुष्टत्वं गोपायितुं अविद्यमानेनापि दोषेण अनुजीविनं योजयति । 'वृत्तिच्छेदं च करोति', स्पष्टं ॥ ४३ ॥

किञ्च, साधूक्तमिति । '§यद्वाक्यं' अनुजीविवाक्यं, 'साधूक्तमपि', 'अन्यथा समर्थयति' असाध्विति योजयति । 'अपर्व्वणि' अयथास्थान

---

* वदतीति मु० । † मन्त्राणि इति मु० ।

‡ भूगन् हास्यं प्रपद्यत इति मु० । § तद्वाक्यमिति मु० ।

एव, 'कथाभङ्गं करोति' तूष्णीम्भावमापद्यते। 'विरसीभवन्' असन्तोषमभिगच्छन्नित्यर्थः॥ ४४॥

किञ्च, उपास्यमान इति। 'सुप्तवच्च विचेष्टते' सुप्त इव वर्त्तते, तत्सेवां निष्फलां कर्त्तुमित्यर्थः। शिष्टं सुगमं॥ ४५॥

अपरञ्च, इत्यादीति। 'इत्यादि' इत्युक्तमादौ कृत्वा [illegible]दपि अनुरक्तविरक्तलक्षणं विद्यते, तदपि लोकतो ग्राह्यं। ततश्च '[illegible]त्', स्वामिनः, 'वृत्तिं समीहेत', अनुजीवी, '*विरक्तञ्च परित्यजेत्', निष्फलत्वात् अनर्थहेतुत्वाच्च॥ ४६॥

अस्यापवादमभिधातुमाह। निर्गुणमिति। श्लोकार्थः सुगमः। ततश्च कृतघ्नतयाऽस्य बह्वपकरोतीति भावः॥ ४७॥

आपत्सूपकारस्य गुणं दर्शयितुमाह। †स्वस्थवृत्तेष्विति। 'स्वस्थवृत्तेषु' अनाकुलेषु प्रभुषु, 'सत्त्वाद्याः' अनुजीविगुणाः, 'अभिलक्ष्यतां', नैव यान्ति' न प्रकाशन्ते, किन्तु ‡'विरोधे', समुपस्थिते 'धर्मधुर्याणां', 'तेषां' अनुजीविनां, 'नामातिरिच्यते' यथाऽनेनानुजीविना विपक्षविरोधी स्वामी रक्षित इति शेषानुजीविमध्ये तस्य नामातिरिच्यते शौर्येणातिरिक्तं भवतीत्यर्थः॥ ४८॥

एतदेव समर्थयन्नाह। श्लाघ्येति। 'महतां' स्वाम्यादीनां, 'उप[illegible]रिता' आपत्सु परित्राणादिका, 'स्वल्पापि', 'काले' कालप्रभावे. 'महोदयं' महाभ्युदयसम्पन्नं, 'कल्याणं' अभ्युदयं, 'आधत्ते' करोति॥ ४९॥

केवलमनुजीविवृत्तमभिधाय बन्धुमित्रसाधारणमभिधातुमाह। अकार्ये इति। 'अकार्ये' शास्त्रनिषिद्धाचरणे, 'प्रतिषेधः' निवारणं, 'कार्ये' धर्मार्थफले, 'अनुवर्त्तनं' क्रियतामेतदित्यनुष्ठानं। 'संक्षेपात्' समासतः, 'बन्धुमित्रानुजीविनां', 'इति सद्वृत्तं' एतत् शोभनं चरितं, ॥ ५०॥

प्रसक्तौ बन्धुमित्रवृत्तमुद्दिष्टमपि भूयोऽप्यनुजीविनां वृत्तमभिधातु-

---

* विरक्तस्येति मु०। † सुस्थक्षतेष्विति मु०। ‡ विपत्स्विति मु०।

माह, पानेति । 'पानस्त्रीद्यूतगोष्ठीषु', मद्यकामं योगपानैः, परस्त्रीकामं अनार्याङ्गनाभिः अमेध्याभिः, द्यूतकामं कापटिकपुरुषैः नोद्वेजयेयुरिति बुद्ध्वा 'अभितः' चतुर्दिक्षु, स्थिताः 'चराः' अनुजीविनः, 'बोधयेयुः' आख्यानकादिभिरित्यर्थः। ततः 'प्रमाद्यन्तं' राजप्रणिधा, निरुद्वेगं, *'नालिकादिभिः' सामादिभिः, 'उपायैः', ॥ ५१ ॥

किञ्च, राजानमिति । 'विवर्त्मसु' विरुद्धाचरणेषु, 'सज्जमानं' आसक्तिं गच्छन्तं, 'राजानं', 'ये हि†' अनुजीवनः, 'उपेक्षन्ते' न निवारयन्ति, 'अकृतात्मानः' असंस्कृतात्मानः, स्पष्टं शिष्टं ॥ ५२ ॥

राजोपासनाक्रममभिधातुमाह । जयेति । 'जयजीव', इत्यादिवचनं स्वामिसमाक्रानप्रभृतिकार्यावसरे वक्तव्यमेव । शिष्टं सुगमं ॥ ५३ ॥

अनुजीविनां संक्षिप्तगुणानभिधातुमाह, भर्तुरिति । पूर्वार्द्धं स्पष्टं । 'हि' यस्मात्, 'रक्षांस्यपि' क्रूरकर्मकारीण्यपि, 'गृह्यन्ते' वशीक्रियन्ते, 'नित्यं' 'छन्दानुवर्त्तिभिः', सेवकैः मनुष्यास्तु गृह्यन्त एवेत्यर्थः। छन्दानुवर्त्तनं वशीकरणं ॥ ५४ ॥

परचित्तवृत्तयो दुर्ग्राह्या भवन्तीत्याशङ्क्याह । धीसत्त्वेति । 'धीः' अष्टगुणा प्रज्ञा, 'सत्त्वं' व्यसनेऽभ्युदये चाविकारित्वं, 'उद्योगः' उद्यमः, एतद्गुणत्रय'युक्तानां', 'महात्मनां' आत्मसम्पदुपेतानां, 'किं', नाम 'दुरापं' दुष्प्रापं, अपितु सर्वमेव प्राप्यं । शेषार्द्धं स्पष्टं ॥ ५५ ॥

उक्तगुणहीनस्तु न कुतश्चित् किञ्चिदासादयतीति दर्शयन्नाह । अलसस्येति । प्रतीतं ॥ ५६ ॥‡

एवमनुजीविवृत्तमभिधाय स्वामिवृत्तमभिधातुमाह । आजीव्य इति । 'आजीव्य' अनुजीवनीयः, 'सर्वभूतानां' सर्वप्राणिनां दाना-भयरक्षणादिभिः, 'राजा' प्रजापतिः, 'पर्जन्य इव' जीमूत इव, '§भवेत्' 'निराजीव्यं' वृत्त्यभावात्, 'एनं' राजानं, 'त्यजन्ति',

---

* नाडिकादिभिरिति मु॰ । † येऽतीति मु॰ ।

‡ 'ये शूराः' अप्रियापि' इति श्लोकावेतौ से॰ का॰ सटीकपु॰ न स्तः।

§ भवति इति पु॰।

'*शुष्कं' निर्जलं, 'सर इव' तड़ागमिव, 'अण्डजाः' पक्षिणो हंसादयः। तस्मात् राज्ञा दानशीलेन भवितव्यं। स्वामी वृत्तिसम्पन्नोऽप्यदाता चेत् न सेव्यत इत्यर्थः॥ ५९॥

एतदेव समर्थयन्नाह। कुलमिति। 'कुलं' सोमसूर्यवंशप्रभवं, 'वृत्तं' रामयुधिष्ठिरवत् सदनुष्ठानं, '†श्रुतं' सर्वशास्त्रपारङ्गमत्वं, 'शौर्यं', परशुरामसमानं, 'सर्वमेतत्', 'न गण्यते' आश्रयणीयत्वलेख्ये नारोप्यते, एभिर्गुणैरेव स्वामी नाश्रयणीयो भवतीत्यर्थः। शेषार्द्धं स्पष्टं॥ ६०॥

प्रसङ्गात् सधनप्रशंसां श्लोकद्वयेनाह, लक्ष्मीरेवेति। उत्थिता एवेति। स्पष्टं॥ ६१॥ ६२॥

भूयोऽपि स्पष्टयन्नाह। अर्थार्थीति। 'अर्थार्थी' जीविकोपकरणप्रार्थयिता, 'जीवलोकः' जीववर्गः, 'ज्वलन्तं' दानशक्त्या प्रज्वलन्तं पार्थिवं, 'उपसर्पति' समीपं गच्छति, एवमर्थार्थी परिजनोऽपि। अतएव 'वत्सः' तर्णकः, 'क्षीणक्षीरां' दुग्धहीनां 'मातरं', 'त्यजति' ॥ ६३॥

भृत्यभरणमभिधातुमाह। अह्रापयन्निति। 'कालमह्रापयन्' कालयापनामकुर्वन्, 'नृपः', 'भृत्यानां' भरणार्हाणां, '‡अनुवर्त्तिनां' इच्छानुविधायिनां अनुजीविनां, 'कर्मणामानुरूप्येण' 'वृत्तिं' जीविकां 'समनुकल्पयेत्' दद्यात्॥ ६४॥

वृत्तिविलोपे दोषं दर्शयन्नाह। काल इति। स्पष्टं॥ ६५॥

अपात्रे दाननिषेधमभिधातुमाह। अपात्रवर्षणमिति। 'अपात्रवर्षणं' असत्पात्रे धनदानं, 'जातु' कदाचिदपि, 'न कुर्यात्', यतस्तत् 'सद्विगर्हितं' सद्भिर्निन्दितं, निष्फलत्वात्। तथाच 'अपात्रवर्षणात् किमन्यत् स्यात् 'कोशक्षयादृते', केवलं कोशक्षय एव स्यादित्यर्थः॥ ६६॥

---

* शुष्कहृदमिति मु०। † श्रुतमिति मु० पु० नास्ति।

‡ अनुजीविनामिति मु०।

पात्रस्वरूपसूचनपूर्वकं तत्सङ्ग्रहार्थमाह। कुलमिति। 'कुलं' शुद्धोभयपक्षतां, 'विद्याश्रुतं'* आन्वीक्षिक्यादिश्रवणं, 'शौर्यं' अभीरुत्वं, 'सौशील्यं' सुशीलतां, 'भूतपूर्वतां' पितृपैतामहागततां, 'वयोऽवस्थां' यौवनावस्थां, 'समीक्ष्य' निरूप्य, 'स्वाद्रियेत' सुन्दरं पात्रं गृह्णीयात्। 'महात्मवान्' 'विजिगीषुः' ॥ ६७ ॥

पात्रभूतानामनादरे दोषं दर्शयन्नाह। कुलीनानिति। 'कुलीनान्' महाकुलप्रसूतान्, 'नावमन्येत,' 'सम्यग्वृत्तान्' सदाचारान्, 'मनस्विनः' प्रज्ञायुक्तान्। यस्मात् 'अवमन्तारं', 'एते' जनाः, 'मानहेतुना', 'त्यजन्ति' परिहरन्ति, 'घ्नन्ति च' निपातयन्ति च, तस्मान्माननीयान्नावमन्येत ॥ ६८ ॥

मध्यमाधमानां गुणस्फुरणमभिधातुमाह। गुणैरिति। 'उदारैः' उत्तमैः, 'गुणैः', 'संयुक्तान्', अनुजीविनः, 'प्रोन्नयेत्' प्रकर्षेण उन्नतिं नयेत्, मध्यमोत्तमा अपि स्वतोऽवश्यमुन्नतियोग्या न भवन्ति। कुत इत्याह, 'महत्त्वं' महतीं उन्नतिं, 'प्राप्नुवन्तः', 'ते', 'नरेश्वरं' स्वामिनं, 'वर्द्धयन्ति' वृद्धिं नयन्ति, कृतज्ञतयाऽर्थसामर्थ्यात्॥ ६९ ॥

विवेकयुक्तेन भवितव्यमित्यभिधातुमाह। उत्तमेति। 'उत्तमाभिजनोपेतान्' महाकुलीनान्, 'नीचैः सह न', संवर्द्धयेत्' नियोगेनाभियोजयेदित्यर्थः। 'हि' यस्मात्, 'क्षणोऽपि' क्षीणोऽपि, 'विवेकज्ञः', 'संश्रयणीयतां' बह्वाश्रयत्वं राजत्वं, 'याति', ॥ ७० ॥

अविवेकित्वस्य दोषं दर्शयन्नाह। निरालोके हीति। 'निरालोके' हेयोपादेयोपदेशकविवेकशून्ये, 'तत्रास्मिन्' प्रसिद्धे, 'लोके' जगति, 'पण्डिता नासते' विवेकिनो नावतिष्ठन्ते, 'यत्र', 'जात्यस्य मणेः' मणिविशेषस्य। शिष्टं स्पष्टं ॥ ७१ ॥

यथा विवेकिसुहृद्योचित्यादिनियोग इष्यते तथा सत्पात्रेष्वपभक्तिरेति दर्शयन्नाह। विश्राम्यन्तीति। 'कल्पतराविव', 'यत्र' श्री-

---

* विद्याश्रुतमिति मु०।

पञ्चप्रकारं प्रजाभयं यथा न भवति तथा कार्य्यमित्याह। पञ्चप्रकारमिति। *'इत्येतत्', अनन्तरोक्तं, 'पञ्चप्रकारं भयं', †'अपोह्य' भीतिमपनीय, '‡नृपतिः' स्वयं, 'काले', आदानयोग्ये 'त्रिवर्गपरिवृद्धये' धर्मार्थकामवृद्ध्यर्थं। §'फलं' धान्यहिरण्यादिकं 'आददीत'॥ ८३॥

दृष्टान्तप्रदर्शनेन प्रजापालनमुपजीवनमभिधातुमाह। यथा गौरिति। 'यथा गौः पाल्यते काले', पिण्याकतृणजलादिना 'काले दुह्यते च', 'तथा प्रजा'। कालविशेषे प्रजानां धान्यपशुहिरण्यादिकेन पालनं,कालान्तरे च ताभ्यो भागकरादानादिना दोहः सम्पद्यते। अत्र द्वितीयो दृष्टान्तः, '‖यथा पुष्पप्रदा लता', पुष्पमालार्थिना मालाकारेण 'सिच्यते', 'पुष्यते' उपचीयते, 'च', तद्वत् इयं प्रजा पाल्यते उपचीयते चेति॥ ८४॥

आयुक्तककृतप्रजापीडननिवारणार्थमाह। आस्रावयेदिति। 'उपचितान्' प्रजापीडया प्रवृद्धान्, अध्यक्षान्, 'साधु' यथा तथा, 'आस्रावयेत्' दण्डप्रणयनेन अपहृतधनान् कुर्यात्, 'दुष्टव्रणानिव', यथा दुष्टव्रणाः स्राविताः सुखाय भवन्ति तथा तादृशा अध्यक्षाः। ¶'आसक्तास्ते च वर्त्तरन्', इत्यादि। यथा वह्निः किं करिष्यत्ययमिति विलम्बितोपहृतिः परित्यक्तः, पाकादिकारको न भवति तथा महीपतिरपि। सद्भक्त्या सेवितः फलदो भवतीति भावः॥ ८५॥

राजविद्रोहाचरणे दोषमाह। स्वल्पमपीति। स्पष्टं॥ ८६॥

नृपतेः कोषविषयकमनुष्ठानमाह। **आप्तैरिति। 'आप्तैः' विश्वास्तैः, 'अधिष्ठितं' परिचालितं, 'कोषं सदा संवर्द्धयेत्', 'काले च' कालविशेषे, 'व्ययं कुर्यात्', स्पष्टमन्यत्॥ ८७॥

---

*-मप्येतदिति मु०। † अपोह्यमिति मु०। ‡ नृपतेरिति मु०।

§ धनमिति मु०। ‖ सिच्यते चीयते चैव लता पुष्पफलार्थिनेति मु०।

¶ आमुक्तास्ते चेत्यादि मु०। **आप्तैः संवर्द्धयेत् कोषं सदा तज्ज्ञैरधिष्ठितमिति टीका सम्मतक्रमस्य विनिमये मुद्रितमूले "संवर्द्धयेत् सदा कोषमाप्तैः" इत्यादि।

धर्मार्थव्ययप्रशंसामाह। *धर्मेणेति। 'धर्मेण' धर्मार्थं, 'क्षीणकोषस्य' निर्धनस्य राज्ञः, 'कृशत्वमपि शोभते', शेषाद्धं स्पष्टं ॥ ८८ ॥

सङ्क्षिप्तमर्थशास्त्रोपदेशमभिधातुमाह। बृहस्पतेरिति। 'बृहस्पतेः', †'शास्त्रस्य निर्णयः' क इत्याह। 'अविश्वासः', इति, कस्यचिदात्मरतमपि न विश्वसेत्, चित्तानित्यत्वात्। अविश्वासधर्मिणां हि मनुष्याणां सर्वथा संव्यवहाराभावः प्राप्नोति ‡'यथाऽसंव्यवहारवान्', भवति अविश्वासश्च तथा कर्त्तव्य इति भावः ॥ ८९ ॥

किञ्च, विश्वासयेदिति। दण्डोपनयनात् भीतान् 'अविश्वस्तान्', अध्यक्षान् 'विश्वासयेत्', स्वयं च 'विश्वस्तान्', अपि 'नातिविश्वसेत्', 'यस्मिन्' अध्यक्षे, स्वामी 'विश्वासमायाति', 'विभूतेः पात्रमेव सः', इत्ययमनुजीविनामुपदेशः ॥ ९० ॥

किञ्च प्रादुर्भवन्तीति। 'यस्मात् चित्तानि', 'अनुक्षणं' प्रतिमुहूर्त्तं, 'अर्थसमं' समर्थैः कार्यैः सह, 'प्रादुर्भवन्ति' अन्यथा भवन्ति, तस्मादित्यादि स्पष्टं ॥ ९१ ॥

एवम्प्रवर्त्तयन्नाह। उद्योगादिति। स्पष्टं ॥ ९१ ॥§

उपसंहरन्नाह। अनुगतेति 'अनुगतपरितोषितानुजीवी' अनुगताविधेयतराः परितोषिता दानमानादिभिरनुजीविनो येन सः। 'मधुरवचश्चरितानुरक्तलोकः' मधुरवचश्चरितैरनुरक्तो लोको यस्य सः। 'सुनिपुणपरमाप्तसक्ततन्त्रः' सुनिपुणं यथा भवति तथा परमाप्तेषु सक्तस्तन्त्रो राज्यभारो येन सः। शिष्टं स्पष्टं ॥ ९२ ॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां स्वानुजीविवृत्तं पञ्चमः सर्गः ॥ ※ ॥

---

* धर्मार्थमिति मु०। † शास्त्रार्थनिश्चय इति मु०।

‡ यथाच व्यवहारवानिति मु०। § उद्योगादनिवृत्तस्य सुसहायस्य धीमतः। छायेवानुगता तस्य नित्यं श्रीः सहचारिणी ॥ ९१ ॥ क्रोडः।

प्रकृतिसम्पत्करणे स्वामिप्रकृत्यभिनामिकात्मसम्पत्तिगुणसम्पादनेनात्मा लब्धः, अमात्यप्रभृतीनां च स्वस्वगुणसम्पादनेन चात्मलाभः सम्पन्नः, एवं सप्ताङ्गराज्यस्यात्मलाभे सम्पन्ने तत्पालनस्यावश्यं वक्तव्यत्वात् तदिच्छाभिधातुमाह ।

लोके इति । 'लोके' लोकव्यवहारे, लोकव्यवहारश्च देशभेदे कालभेदे च स्वतन्त्रः स्वतन्त्रो भवति, यथा मध्यदेशे एको धर्मः, पारसीकादिषु चान्यः, तथा कृतयुगेऽन्यः, त्रेतादियुगेषु चान्यः, इति लोकव्यवहारे, 'वेदे', शास्त्रे 'च', 'कुशलः', लोकव्यवहारं वेदोक्तञ्च निरीक्ष्य उभयाविरुद्धं व्यवहरेदिति भावः । तथा लोके वेदे च 'कुशलैः' निपुणैः, अनुजीविभिः, 'परिवारितः' सम्मिलितः, 'आदृतः' आदरपरः, 'नृपः', विजिगीषुः *'सबाह्याभ्यन्तरं' बाह्याभ्यन्तरविभागेनावस्थितं, 'राज्यं चिन्तयेत्', स्पष्टं ॥ १ ॥

राज्यस्य वाह्याभ्यन्तरविभागं दर्शयन्नाह । आभ्यन्तरमिति । 'आभ्यन्तरं', राज्यं विजिगीषोः 'स्वं शरीरं, एव 'बाह्यं' राज्यं 'राष्ट्रं', एव 'उदाहृतं', स्पष्टं । 'अन्योन्याधारसम्बन्धात्', राज्ञा विना राष्ट्रं राष्ट्रेण विना राजा न वर्त्तत इत्यर्थः । यस्मात् 'एकमेवेदं', 'इष्यते' इति प्रतीतं ॥ २ ॥

एतदेव दर्शयन्नाह । राज्येति । 'राज्याङ्गानान्तु सर्वेषां' अमात्यादीनां, 'राष्ट्राद्भवति सम्भवः', राष्ट्रात् कोशः, कोशाच्चतुरङ्गो दण्डः, राष्ट्रस्य भूम्येकान्तरं मित्रं राज्ञ एव स्थानीयं दुर्गं राष्ट्रादेव जानपदादयोऽमात्याः । 'प्रसाधयेत्' लाभं पालनञ्च कुर्यादित्यर्थः । स्पष्टमन्यत् ॥ ३ ॥

राज्ञः स्वशरीरपालनमपि धर्माय भवतीति दर्शयन्नाह । लोकानुग्रहमिति । पूर्वार्द्धस्यार्थः सुगमः । 'राज्ञः', †'संरक्षणं' प्रजासंर-

---

* सबाह्याभ्यन्तरं नृप इत्यस्य परिवर्त्ते स वाह्याभ्यन्तरं तथेति मु० ।

† राज्ञः संशरणमिति मु० ।

क्षणमेव, *'धर्मः' नान्यः। 'शरीरं धर्मसाधनं', धर्मार्थिना विजिगीषुणा स्वशरीरमेव यत्नेन रक्षणीयमित्यर्थः ॥ ४ ॥

प्रजारक्षणे चौरादिहिंसा हिंसा न भवतीति दर्शयन्नाह । 'धर्म्या-मिति। 'धर्म्यां' धर्मादनपेतां, 'हिंसां', 'आरेभिरे' आरब्धवन्तः, 'ऋषिकल्पाः' ऋषितुल्याः, 'महीभुजः' राजानः। यथा महर्षयो यज्ञेषु पश्वालम्भनरूपं धर्म्यं कुर्वन्ति तथा राजर्षयोऽपि चौरादिनिग्रहरूपां धर्म्यां हिंसां कुर्वन्ति । शेषार्द्धं सुगमं ॥ ५ ॥

किञ्च, धर्मसंरक्षणपर इति। स्पष्टं ॥ ६ ॥

धर्मस्वरूपमभिधातुमाह। यमार्या इति। स्पष्टं ॥ ७ ॥

किञ्च, धर्माधर्माविति। 'परिपन्थिनः' प्रजोपद्रवकारिणः। स्पष्टमन्यत् ॥ ८ ॥

दुष्टलक्षणमभिधातुमाह । राज्योपघातमिति । स्पष्टं ॥ ९ ॥

दूष्येषु कर्त्तव्यमभिधातुमाह । †दुष्टानिति। 'उपांशुदण्डेन' गुप्तविषदानयोगकृतेन प्रच्छन्नबधरूपेण,। ‡'प्रदुष्य च प्रकामं हि' प्रकृष्टोपायैः दोषयुक्तान् कृत्वा । शिष्टं स्पष्टं ॥ १० ॥

अपरञ्च, राजेति। 'रहसि' एकान्तमध्यमकक्षायां, §'दुष्टं' उक्तलक्षणं, 'उपमन्त्रयेत्' समाह्वयेत्। 'गूढशस्त्राः' प्रच्छादितशस्त्रकाः, 'तत्पश्चात्' तेषां पश्चात्, 'आसञ्जताः' प्रागेव राज्ञा ते संहतिं नीताः प्रतीपत्वेन स्थापिताः ॥ ११ ॥

किञ्च, ‖विशत इति। 'द्वाःस्थाः' प्रतीहाररक्षिणः, 'शस्त्रग्राहकाः', 'कक्षान्तरं गतान्', स 'विशतस्तान्', 'विचिन्वीयुः' शोधयेयुः। 'ते' च शस्त्रग्राहकाः, एष्टाः सन्तः, 'प्रहृष्टाः स्मः', स्वामिबधाय दुष्टैः 'इति स्फुटं ब्रूयुः' ॥ १२ ॥

---

* धामेति मु० । †दूष्यानिति मु० । ‡ अदृश्यं वा प्रकाशं वेति मु० ।
§ दूष्यमिति मु० । ‖ विश्वस्तानिति मु० ।

अन्यच्च, इतीति। 'राजशल्यं' दूष्यादिकं, 'समुद्धरेत्' छेदयेत्, स्पष्टमन्यत्॥ १३॥

प्रजावृद्धिः फलाय भवतीति दर्शयन्नाह। यथेति। स्पष्टं॥ १४॥

दुष्टदमनात् प्रजारक्षणं भवतीत्युक्तं तच्च शास्त्रोक्तं श्रेय इति दर्शयन्नाह। उद्वेजयतीति। 'तीक्ष्णेन' अन्यायादधिकेन दण्डेन, 'उद्वेजयति', प्रजा इति शेषः। 'मृदुना' अनुकम्पया प्रमाणहीनेन, 'परिभूयते', भयाभावात्। 'तस्मात्' तेन कारणेन, 'यथार्हतः' यो यद्दण्डयोग्यस्तदनुसारेण, 'पक्षमनाश्रितः' अपक्षपाती सन्, 'दण्डं नयेत्', ॥ १५॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां कण्टकशोधनं नाम षष्ठः सर्गः॥ ६॥

सप्तमः सर्गः ।

कण्टकशोधनशेषमेवात्मजरक्षणमभिधातुं, अरक्षिताः पुत्राः क-ण्टकीभवन्ति पितुः प्रजानाशेति दर्शयन्नाह । प्रजात्मश्रेयसे इति । 'प्रजात्मश्रेयसे' प्रजानां आत्मनश्च मङ्गलाय, 'राजा' विजिगीषुः, 'आ-त्मजरक्षणं कुर्वीत', । कुतस्तद्रक्षणमिति 'लोलुभ्यमानाः', 'ते' पुत्राः, स्पष्टमन्यत् ॥ १ ॥

किञ्च, राजपुत्रा इति । 'अभिमानिनः' अहमेव राज्यार्ह इत्यभि-मानसम्भावनया युक्ताः, 'भ्रातरं', राज्ययोग्यं, 'पितरं', राजानं । स्पष्टमन्यत् ॥ २ ॥

किञ्च, राजपुत्रैरिति । 'मदोन्मत्तैः' अभिषिक्तमदात् जातोन्मादैः, 'प्रार्थ्यमानं' अभिलष्यमाणं, 'इतस्ततः' सर्व्वतः अभियोगात्, शेषः सुगमः ॥ ३ ॥

अपरञ्च, रक्ष्यमाणा इति । प्रतीतं ॥ ४ ॥

राजपुत्राणां रक्षाप्रकारं सुश्लिष्टमभिधातुमाह, विनयोपग्रहा-निति । 'विनयोपग्रहान्' विनयो द्विविधः कृतकः सहजश्च । विद्या-वृद्धसंयोगजनितः कृतकः, जन्मान्तरवासनावशाज्जातः सहजः स्वा-भाविकः। द्विविधविनये उपग्रहो बन्धनं येषां ते तान् । अवशिष्टं सुगमं ॥ ५ ॥

विनीतपुत्रस्य यौवराज्याभिषेचनमभिधातुमाह, विनीतमिति । 'उद्वृत्तं' दुःशीलं, 'दुष्टं गजमिव', 'सुखबन्धनं', ग्राम्यसुखोपरोधेन राजकुमारः पितरं नाभिहन्तीत्येवंविधं सुखबन्धनं, 'कुर्वीत'। शेषः सुगमः ॥ ६ ॥

दुर्वृत्तस्यापि राजपुत्रस्यापरित्यागमाह, राजपुत्र इति। स्पष्टं ॥ ७ ॥

उक्तप्रकारस्य राजपुत्रस्यापरित्यक्तस्य शासनप्रकारमभिधातुमाह, व्यसन इति । सुगमं ॥ ८ ॥

राजपुत्ररक्षणमभिधाय राजात्मरक्षणं तावदाह। याने इति। 'याने' शिविकादौ, 'शय्यासने' पर्य्यङ्कादिके सिंहासने विष्टरकादौ, पाने' पानीयादौ, 'भोज्ये' 'आहारादौ' 'वस्त्रे' वसनोत्तरीयादौ, ''विभूषणे' अलङ्करणादौ, 'सर्व्वत्रैव' आर्य्यस्त्रीसङ्गादौ, 'अप्रमत्तः' सावधानः, 'स्यात्', न विश्वसेदित्यर्थः, '*उज्झेत विषदूषितं', तं ज्ञात्वा परिहरेदित्यर्थः ॥ ९ ॥

विषप्रतीकारार्थमाह, विषघ्नैरिति। 'विषघ्नैरुदकैः' श्वेतपुष्कर-पुष्पचन्दनादिभी रचितैर्जलैः, 'स्नातः', एवंविधजलैः स्नातस्य स्थाने गुणा-नि सर्व्वविषाणि न प्रसरन्तीति कौटल्योपदेशात्। 'विषघ्नमणिभूषितः' गरुडोद्गारमणिनाऽलंकृतः। तथाचोक्तं 'रचितो गरुडोद्गारमणि-र्यस्य विभूषणं। स्थावरं जङ्गमं तस्य विषं निर्विषतां व्रजेत्' इति। 'परीक्षितं', वक्ष्यमाणप्रकारेण, 'समश्नीयात्', राजा 'जाङ्गुलीविद्विष-गवृतः' महानुभाववृद्धसिद्धान्तायुक्तविषविद्याविशारदविषवैद्यगणैः परिवृतो राजा भोजनं कुर्य्यादित्यर्थः ॥ १० ॥

विषदूषितान्नपरीक्षामभिधातुमाह, भृङ्गराज इति। 'भृङ्गराजः' कृष्णपक्षी गोपुच्छकः, 'शुकः सारिका च', इति त्रयः पक्षिणः प्रसिद्धाः। शेषार्द्धं स्पष्टं ॥ ११ ॥

किञ्च, चकोरस्येति। 'चकोरस्य' लोहिताक्षपक्षिविशेषस्य, 'विर-ज्येते' रागरहिते भवत इत्यर्थः। 'क्रौञ्चः' लोहितमस्तकः पक्षिवि-शेषः, 'सुव्यक्तं', यथा तथा, 'माद्यति', सुरया इव। 'कोकिलः', मत्तो भूत्वा 'म्रियते' प्राणान् परित्यजति। शेषः सुगमः ॥ १२ ॥

अपरञ्च, नित्यमिति। स्पष्टं ॥ १३ ॥

अन्यच्च, मयूरेति। 'मयूरपृषतोत्सर्गे', मयूरः प्रसिद्धः, पृषतः चित्र-मृगविशेषः, भवने तयोरुत्सर्गः सर्पनाशाय भवति इत्यर्थः ॥ अन्यत् प्रतीतं ॥ १४ ॥

---

* वर्जेतेति मु०।

अपरञ्च, भोज्यमिति। स्पष्टं ॥ १५ ॥

विषदिग्धान्नप्रदानेनाग्नेः पक्षिणाञ्च स्वरूपवैलक्षण्यमभिधातुमाह, धूमेति।। 'वह्नेः', 'धूमार्चिर्नीलता' धूमस्यार्चिषां च नीलता, 'शब्दस्फोटश्च', 'स्फुटं 'जायते', शेषार्द्धं सुगमं ॥ १६ ॥

विषदिग्धान्नस्वरूपमाह, अखिन्नतेति। 'अखिन्नता' तीव्रेण वह्निनापि खिन्नता न भवतीति, 'मादकत्वं' मदजनकता, *'आशु शैत्यं' सत्वरमुष्णतापगमः, 'विवर्णता' श्यामता, 'अन्नस्य' शाल्यादेः, 'विषदिग्धस्य', 'उष्मा' वाष्पः, 'स्निग्धमेचकः' नीलोज्ज्वलः ॥ १७ ॥

विषदूषितव्यञ्जनस्य स्वरूपमाह, व्यञ्जनस्येति। 'क्वथने', अग्निं विना, शेषः सुबोधः ॥ १८ ॥

विषदूषितरसद्रव्यस्य स्वरूपमभिधातुमाह, छायेति। 'रसे' क्षीरजलादौ, 'छाया' दीप्तिः, †अधिका 'हीना वा' ‡'राजदूर्द्धं' दीप्तिमच्छिरस्कं, 'फेनमण्डलमेव, च', दृश्यते ॥ १९ ॥

विषदूषितरसविशेषाणां सरसद्रव्यविशेषाणां च वर्णविशेषानभिधातुमाह, रसस्येति। 'रसस्य' इक्ष्वादिरसस्य, शिष्टं प्रतीतं ॥ २० ॥

आर्द्रस्येति। 'आर्द्रस्य' हरितस्य अन्नफलादेः, 'प्रम्लानभावः', वृन्तप्रदेशे। 'पाकं विना §क्वाथविलीनभावः' अपक्वशुष्कता, शेषः सुगमः ॥ २१ ॥

अपिच, शुष्कस्येति। 'विषोपदेहात्' विषसम्पर्कात्, 'शुष्कस्य' 'सर्व्वस्य' कटकादेः, 'विशीर्णता' म्लानता, 'अशुचिवर्णता च', भवति। स्पष्टमुत्तरार्द्धं ॥ २२ ॥

अपरञ्च, प्रावारेति। 'प्रावारास्तरणानां' प्रावरणानि कम्बलादीनि आस्तरणानि सरोमकार्पासतूलकादीनि तेषां, 'श्यामैः' मलिनैः,

---

* आशु शल्यमिति मु०। † अतिरिक्तेति मु०। ‡ राजिरूर्द्धेति मु०। § क्वाथविनीतभाव इति मु०।

'मण्डलैः' 'आकीर्णता' व्याप्तता, *'तन्त्र्यां' तन्त्वग्रचितानां, 'पक्ष्मणां' विशिष्टपक्ष्मलोमनिर्म्मितानां, 'लोम्नां' अविलोमविरचितानां '† भ्रंशः' शातनं, 'स्यात्', 'विषाश्रयात्' विषोपदेशादित्यर्थः ॥ २३ ॥

अपिच, लोहानाञ्चेति । 'लोहानां' सुवर्णादीनां, 'मणीनां' प्रवाला-दीनां, विषोपदेशात् 'मलपङ्कोपदिग्धता' कलङ्ककीटलिप्तता' । 'प्र-भावः' वीर्य्यं, 'स्नेहः' स्निग्धभावः 'गुरुता' भारः, 'वर्णः' लोहितपी-तादिः, 'स्पर्शः' सुखस्पर्शत्वं, एतेषां च 'वधः' विनाशः । 'तथा', संस्कृ-तविषाश्रयादेव, नहि सामान्यविषेण लोहमणीनां प्रभावो विनाश-यितुं शक्यते ॥ २४ ॥

श्लोकद्वयेन विषदायिनामपि लिङ्गान्यभिधातुमाह, संशुष्केति‡ । 'संशुष्कश्यामवक्त्रत्वं' स्वदोषदण्डभावनया मुखस्य शुष्कत्वं विवर्णत्वं च भवतीत्यर्थः । '§वाग्भङ्गः', स्पष्टार्थं वक्तुं न शक्नोतीत्यर्थः । 'जृम्भणं मुहुः', सुप्तोत्थितस्येव भवति । 'स्खलनं' समेऽपि मार्गे गतिभङ्गः, 'वेपथुः' कम्पः, शीतस्याभावेऽपि 'स्वेदः', प्रवातेऽपि 'आवेगः' उद्विग्न-ता, निमित्ताभावेऽपि, 'दिग्विलोकनं', दण्डप्रणेतृपुरुषागमनशङ्कया । अपिच, स्वकर्म्मणीति । 'स्वकर्म्मणि' स्वपाकपेयाद्यनुष्ठाने । 'स्वभूमौ' स्वीयगृहादौ, 'अनवस्थानं', दोषपरिहारबुद्ध्याऽहमत्र नावस्थि- इति सङ्कल्पेन । 'एतानि', इत्यादि सुप्रतीतं ॥ २५ । २६ ॥

विषप्रयोगप्रतिषेधार्थमाह, औषधानि चेति । 'औषधानि', 'तत्क-ल्पकैः' चिकित्सकैः, यथायोगं 'पानं' पेयोद्भवं, 'पानीयमेव च', 'तत्क-ल्पकैः', 'समास्वाद्य' प्रतिस्वाद्यास्वादं ग्राहयित्वा, 'भोजनानि प्राश्नी-यात्', राजा ॥ २७ ॥

अपिच, प्रसाधनादीति । 'प्रसाधनं' अलङ्कारः, आदिशब्दात्

---

* तन्तूनामिति मु० । † ध्वंस इति मु० ।

‡ मुखस्य श्यामवर्णत्वं इति मु० । § स्वरभेद इति मु० ।

विलेपनमाल्यादि। 'यत्किञ्चित्' अन्यदपि वस्तु, 'तत्सर्व्वं', 'सुपरीक्षितमुद्रितं', मन्त्र्यादिभिः 'परिचारकाः' सेवकाः, 'उपनिन्युर्नरेन्द्राय', नान्यथा॥ २८॥

अपरञ्च, परस्मादिति। 'अभिरक्षिभिः' रक्षानियुक्तैः, स्पष्टमन्यत्॥ २९॥

किञ्च, यानमिति। पूर्व्वार्द्धं सुगमं। 'अविज्ञातेन', स्वयमनुचरैर्वा 'सङ्कटेन' अविस्तीर्णेन, 'मार्गेण', 'न व्रजेत्', परकृताभिसन्धानप्रतिषेधार्थं॥ ३०॥

परप्रयुक्ततीक्ष्णरभसादिप्रतिषेधमाह, वीक्षितादृष्टेति। 'वीक्षितादृष्टकर्म्माणं' स्वामिना वीक्षितमप्यदृष्टं दुष्कर्म्म यस्य तं, 'आप्तं' विश्वासयोग्यं, 'वंशक्रमागतं' पितृपैतामहं, 'संविभक्तं' कृतजीविकासंविभागं, 'जनं', 'आसन्नवर्त्तिनं', राजा आत्मरक्षार्थं 'कुर्व्वीत', ॥ ३१॥

ये आसन्नवर्त्तिनो न कर्त्तव्यास्तानभिधातुमाह, अधार्म्मिकांश्चेति। 'अधार्म्मिकाः' पापिष्ठाः, 'क्रूराः' हिंस्राः, 'दृष्टदोषाः' प्रत्यक्षीकृतशास्त्रविरुद्धाचाराः, 'निराकृताः' दोषादेव दूरीकृताः, 'परेभ्योऽभ्यागताः' शत्रुसमीपतः समागताः, ये तान् 'एतान्', सर्व्वान् 'दूरादेव विवर्जयेत्', ॥ ३२॥

जलपथे आत्मरक्षार्थमाह, महावातेति। 'महावातसमुद्धूतां' महावातैरस्थिरतरां, 'अपरीक्षितनाविकां' अगृहनाविकां, '*अन्यनौप्रतिबद्धान्तां' अन्यनौसक्तान्तां, 'आतुरां' दुर्घटितत्वादनवस्थितां, 'नौपेयात्' नारोहेत्॥ ३३॥

जलक्रीडायामपि आत्मरक्षार्थमाह, परितापिष्विति। 'परितापिषु' परितापवत्सु ग्रीष्मकालेषु, 'पश्यन्', स्वयमित्यर्थः स्पष्टमन्यत्॥ ३४॥

---

* अन्यनौप्रतिबद्धां वा इति मु०।

वनविहारमभिधातुमाह, गहनानीति। 'गहनानि' लतास्तम्बसङ्कटानि वनानि, 'विशुद्धं, शस्त्रिभिर्बहिरन्तश्च कृतशोधनं, 'उद्यानवनं', 'मधुरं वयोऽनुरूपञ्च', यथा भवति तथा 'विहरन्' विलसन्, 'न माद्येत्', मन्दं मन्दं गच्छेत् स्पष्टमवशिष्टं ॥ ३५ ॥

मृगयायानमभिधातुमाह, सुविनीतेति। *'सुविनीतसुवेशपृष्ठयानः' सुशिक्षितशोभनवेशबद्धहस्त्यश्वपृष्ठयायी, 'सुखगम्यां' सुप्रवेशां, 'उचितां' उपयुक्तां, 'लक्ष्यसिद्धौ' लक्ष्यसिद्ध्यर्थं, 'सुपरीक्षितरक्षितान्तसीमां' सुविज्ञातप्रान्तभागां, 'मृगाटवीं' शरव्यजीवबहुलामरण्यानीं, 'लघुकोष्ठः' क्षिप्रहस्तः, मृगयू राजा 'उपेयात्', ॥ ३६ ॥

परगृहप्रवेशे तच्छोधनमभिधातुमाह, कारयेदिति। 'आदौ' प्रथमे, 'भवनशोधनं कारयेत्', तीक्ष्णादिनिरासार्थं। †'मातुरन्तिकमप्युपविविक्षुः' जननीसन्निधिमुपवेष्टुमिच्छुः,'आप्तशस्त्र्यनुगतः' विश्वस्तशस्त्रधारिपुरुषैरनुगतः। स्पष्टमन्यत्॥ ३७ ॥

राजगमननिषेधकसमयमाह, पांशूत्करेति। सुगमं॥ ३८ ॥

राजनिर्गमप्रवेशावभिधातुमाह, निर्गमे चेति। 'सम्यगाविष्कृतोन्नतिः', शरीरसौष्ठवप्रदर्शनार्थं, 'समन्ततः' सर्व्वतः, 'प्रोत्सारितजनं' अपसारितलोकं, 'राजमार्गं गच्छेत्', इत्यादि स्पष्टं ॥ ३९ ॥

यात्रोत्सवसमाजेषु जनतायुतप्रदेशेषु च राजगत्यागमननि[illegible] मभिधातुमाह, यात्रेति। स्पष्टं ॥ ४० ॥

निशीथप्रणिधीनभिधातुमाह, निषेवित इति। ‡'वर्षवरैः' षण्ढैः, 'कञ्चुकोष्णीषधारिभिः' वारवाणशिरोवेष्टनधारिभिः, शिष्टं स्पष्टं ॥ ४१ ॥

अन्तःपुरामात्यै राजनर्म्माभिधातुमाह, नीचैरिति। 'नीचैः', औद्धत्यमपहाय 'अन्तःपुरामात्याः' अन्तःपुररक्षानियुक्ताः, 'शुचयः'

---

* सुविनीतसुवेशपृष्ठयान० इति मु०। † मातुरन्तिकमपि प्रविविक्षुरिति मु०। ‡ वर्षधरैरिति मु०।

कामोपधाविशुद्धाः, 'चित्तवेदिनः' चित्तज्ञाः, 'शस्त्राग्निविषवर्ज्जं', यथा भवति तथा, अपायहेतुत्वात् ते वर्जनीया इत्यर्थः, । 'नर्म्मयेयुः' क्रीडयेयुः, 'महीपतिं', ॥ ४२ ॥

अन्तर्वेंश्मिकसैन्यस्य राज्ञो रक्षाविधानमाह, अन्तरिति । *'अन्तर्वेंश्मिकसैन्यं' पुत्रदाराद्याभ्यन्तरवंशरक्षानियुक्तं सैन्यं, †'हि' स्फुटं, 'सन्नद्धं' गृहीतशस्त्रसन्नाहं, 'साधुसम्मतं', सकलगुणयुक्तत्वात्, ‡'आयुधकुशलं' रक्षाविधाननिपुणं, 'नृपं रक्षेत्', अन्येषां तत्रानवकाशत्वात् ॥ ४३ ॥

अवरोधशौचज्ञानाधिकारमाह, आशीतिकाश्चेति । 'आशीतिकाः', पूर्णाशीतिवर्षाः पुरुषाः, 'पञ्चाशत्काः' पूर्णपञ्चाशद्वर्षाः, 'योषितः', उपशान्तरागत्वादिङ्गितो न भवतीति 'बुध्येरन्', 'अवरोधानां' अन्तःपुराणां, 'शौचं' शुचिभावं, 'आगारिकाः' आगारे नियुक्ताः ॥ ४४ ॥

पण्यस्त्रीणां राजसेवामभिधातुमाह, रूपेति । रूपमेवाजीवन्ति इति 'रूपाजीवाः' पण्यस्त्रियः, 'स्नाताः' राजस्नानावसरे कृतमज्जना; 'परिवर्त्तितवाससः' राजकीयवस्त्रैरेव परिवर्त्तितानि स्ववासांसि याभिस्ताः । 'राजानमुपतिष्ठेयुः', 'विशुद्धस्रग्विभूषणाः', रसधूपाङ्गप्रलेपशङ्कानिवृत्त्यर्थं ॥ ४५ ॥

कुहकादिभी राजसंसर्गनिषेधमाह, कुहकैरिति । 'कुहकैः' इन्द्रजालविद्यावद्भिः, 'जटिलैः' जटाधरैः शैवादिभिः, 'मुण्डैः' मुण्डितमुण्डैः भिक्षुकादिभिः,'बाह्यैर्दासीजनैः' वेश्यादिभिः,'आभ्यन्तरो जनः' अन्तःपुरसञ्चारी जनः, 'संसर्गं न क्वचिद्गच्छेत्', ॥ ४६ ॥

विषप्रवेशादिसंसर्गनिषेधार्थमाह, निर्गच्छेदिति । 'आभ्यन्तरो जनः' अन्तःपुरसञ्चारी जनः, 'विज्ञातद्रव्यसञ्चारी' द्वारस्थैर्विज्ञातानां द्रव्याणामेव सञ्चारणं विद्यते यस्य सः । 'कारणेनोपलक्षितः' राजविदितेनैव प्रयोजनेन विदितः ॥ ४७ ॥

---

* अन्तर्वेश्मिक० इति मु० ।　† चेति मु० ।　‡ आयुक्तकुशलैरिति मु० ।

साङ्क्रामिकव्याधिप्रतीकारार्थमाह, न चेति। 'अनुजीविनं' भृत्यं 'अकल्यं' व्याधितं, 'पृथिवीपतिः', व्याधिसंसर्गप्रतिषेधार्थं 'न पश्येत्', 'अन्यत्रात्ययिकाद्योगात्', यदि मुख्योऽनुजीवी अत्ययकारिणा रोगेणाभिभूयते तदा पश्येत् आत्मना प्रतीकारं कृत्वा इत्यर्थः। स्पष्टं शिष्टं ॥ ४८ ॥

कस्मादित्याह, स्नात इति। राजा 'स्नातः' शुद्धकायः, 'अनुलिप्तसुरभिः' कुङ्कुममृगमदादिभिः सौरभवान्, 'स्रग्वी' मालत्यादि[illegible]रभिपुष्पमालाधारी, 'रुचिरभूषणः' भास्वराभरणशाली, सर्व्वथा देवीनां मनोहरो भूत्वा तच्चित्ताराधनार्थं 'देवीं *पश्येत्', स्वानुरागरक्षार्थं। अन्यत् स्पष्टं ॥ ४९ ॥

पराभिसन्धाननिवारणार्थमिदमाह, नहीति। 'नहि' नैव, 'आत्मीयात् सन्निवेशात्' स्वीयवासभवनात्, 'देवीगृहं रिरंसया गच्छेत्', अन्यत् सुबोधं ॥ ५० ॥

विश्वस्तानामपि स्त्रीकृतविनाशमाह, देवीगृहेति। 'देवीगृहगतं' 'भद्रसेनाख्यं', 'भ्राता', कनीयान् निषिद्धप्रवेशो वीरसेनोऽनुरक्तया देव्या प्रेरितोऽमारयत्। तथा 'मातुः शय्यान्तरे लीन औरसः सुतः', कुपितया जनन्या प्रेरितः पुत्रान्तरदत्तराज्यं 'कारूषं' करूषदेशाधिपं, अमारयदित्यनुवर्त्तते ॥ ५१ ॥

अपरञ्च, लाजानिति। देवीदत्तविषदिग्धलाजभक्षणेन रहोगतः काशीराजो विनाशित इति फलितार्थः ॥ ५२ ॥

अन्यच्च, विषेति। स्पष्टं ॥ ५३ ॥

अपरञ्च, वेण्यामिति। सुबोधं ॥ ५४ ॥

दारगुप्तेः फलं दर्शयितुमाह, यस्येति। श्लोकार्थः स्पष्ट एव। लोकद्वयमित्यादिना परलोकेऽपि कुलकलङ्काभावात् स्वर्ग इति भावः ॥ ५५ ॥

धर्म्मार्थं दाररक्षार्थञ्च अभिधातुमाह, धर्म्ममिति। 'अनुक्रमात्'

* गच्छेदिति स०।

शास्त्रोक्तक्रमेण, 'वाजीकरणवृंहितः' वाजीकरणैः शास्त्रोक्तैः प्रक्रिया-विशेषैः वृंहितः कृतशुक्रवृद्धिः, शेषः सुगमः ॥ ५६ ॥

शयनविधिमभिधातुमाह, विचार्य्येति । 'विचार्य्य' निर्णीय, 'कार्य्या-वयवान्' अहोरात्रं षोडशधा विभज्याहोरात्रावयवेषु ये कार्य्यावयवा-स्तान्, 'दिनक्षये लोकं *विसर्ज्य', 'प्रमदाहृतक्रियः' प्रमदागणसमा-हृतकार्य्यजातः, पुरुषाणामन्तःपुरप्रवेशाभावात् । '†अशस्त्रबन्धेन' श-स्त्रबन्धविरहितेन, 'पाणिना' स्वकीयकरेण, विशिष्टः सन्, सर्व्वदा करसन्निहितं शस्त्रं विधेयमित्यर्थः । 'स्वपेत्' निद्रां गच्छेत्' 'असक्तं', यथा तथा, निद्रायामपि आसक्तिर्न कर्त्तव्येत्यर्थः । 'परमाप्तरक्षितः, विश्वस्तान्तर्वंशिकपुरुषैः रक्षितः ॥ ५७ ॥

निद्रासक्तिनिरासार्थमाह, नयेनेति । 'नयेन' नीत्यनुष्ठानेन, 'जा-ग्रति' अप्रमत्तत्वेन सर्वं कार्य्यजातं पश्यति, 'नरेश्वरे', सति 'निराधयः' निःशेषितचित्तपीड़ाः, उपद्रवकारिणां निग्रहादित्यर्थः । 'प्रजाः', 'सुखं', यथा भवति तथा, 'स्वपन्ति' निद्रां यान्ति, 'प्रमत्तचित्ते' विषयासक्तमानसे, '‡स्वपितरि' तस्मिन् सति, '§असद्भयात्' दस्यु-प्रभृतिभ्यो भयं प्राप्य, 'प्रजागरेण,' 'अस्य' राज्ञः, 'जगत्' प्रजारूपं 'प्रबुध्यते' निद्राविहीनं भवति । तस्मात् जितनिद्रेण राज्ञा भवि-तव्यमित्यर्थः ॥ ५८ ॥

नृपराज्ययोः साधुलक्षणे पूर्व्वाचार्य्यसम्मतिमाह, इति स्म पूर्व्व-मिति स्पष्टं ॥ ५९ ॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां राजपुत्रात्मरक्षणं नाम सप्तमः सर्गः ॥ * ॥

---

* विसृज्येति मु० । † अशस्त्रेति मु० । ‡ स्वपिमीहेति मु० । § सद्भयादिति मु० ।

अष्टमः सर्गः।

मण्डलाधिपस्य राज्ञो मण्डलशोधनप्रकारमभिधातुमाह, उपेत इति। 'उपेतः कोषदण्डाभ्यां' पूर्वोक्तप्रकृतिसम्पद्युक्तः, अवशिष्टार्थः सुगमः॥ १॥

अपरञ्च, रथीति। 'रथी' विजिगीषुः, 'विशुद्धे' मित्रभावापन्ने, 'मण्डले' अरिमित्रादिके, 'चरन्', 'विराजते'। उत्तरार्द्धं स्पष्टं। सर्व्वथा मण्डलशुद्धिर्विधेयेति भावः॥ २॥

विजिगीषोः स्वमण्डलापेक्षत्वमभिधातुमाह, रोचत इति। 'रोचते' प्रियो भवति, 'सर्वभूतेभ्यः' वर्णचतुष्टयसङ्कीर्णजात्यादिरूपप्रजाभ्यः, *'सम्पूर्णमण्डलः', सप्तप्रकृतिकं राज्यं मण्डलं, ताश्च सप्त प्रकृतयो यदा स्वगुणसम्पदुपेता भवन्ति तदा सम्पूर्णमण्डलशब्देनोच्यते। विजिगीषुणा सर्वदा सम्पूर्णमण्डलेन भाव्यमिति भावः। शिष्टं स्पष्टं॥ ३॥

एतदेव समर्थयन्नाह, अमात्येति। 'एताः' पञ्च, 'प्रकृतयः' 'विजिगीषोः', भोग्यत्वेन 'उदाहृताः', इति भावः। श्लोकार्थः सुगमः॥ ४॥

एतदतिरिक्तं प्रकृतिद्वयमभिधातुमाह, एता इति। मित्रराजभ्यां सह अनन्तरोक्ताः प्रकृतयः सप्त भवन्तीत्यर्थः॥ ५॥

विजिगीषुलक्षणमभिधातुमाह, सम्पन्नस्त्विति। स्पष्टं॥ ६॥

किञ्च, कौलीनमिति। 'स्थूललक्षिता' दानावसरे स्थूलं बह्वेव लक्षीकरोति स्वल्पं दातुं न जानातीत्यर्थः। 'प्रागल्भ्यं' अपरिषङ्कीर्णत्वं शेषः सुगमः॥ ७॥

अपरञ्च, अदीर्घसूत्रतेति। 'अदीर्घसूत्रता' दीर्घकालं सूत्र्यते पर्य्यालोच्यते कार्य्यमिति दीर्घसूत्रं तस्य भावः दीर्घसूत्रता तदभावोऽदीर्घसूत्रता शीघ्रकारिता, 'अक्षौद्रं' परगुणासहिष्णुत्वरूपक्षुद्रताविहीनत्वं, 'प्रश्रयः' विनीतभावः, अलुब्धता च, 'स्वप्रधानता' स्वयं प्रधानत्वं, 'देशकालज्ञता' कार्य्यानुगुणदेशकालस्वरूपज्ञानवत्त्वं, 'दार्ढ्यं' दृढ़ता,

---

* अक्षपद्मपत्त्र इति मु०।

परिगृहीतापरित्याग इत्यर्थः। 'सर्वक्लेशसहिष्णुता' क्षुत्तृष्णादिसर्वसहत्वं ॥ ८ ॥

अन्यच्च, सर्वेति। 'सर्वविद्यानिता' सकलकलाकुशलत्वं, 'दाक्ष्यं' आशुकारित्वं, *'ऊर्जाः' कायबलवत्त्वं, 'संवृतमन्त्रता', इङ्गिताकारादिगोपनात्। 'अविसंवादिता' विरहितशब्दच्छलाभिसन्धानशीलत्वं, 'शौर्य्यं' अभीरुत्वं, 'भक्तिज्ञत्वं' अनुजीव्यादिकृतभक्तिज्ञता, 'कृतज्ञता' कृतोपकारमानित्वं ॥ ९ ॥

किञ्च, शरणागतेति। 'अमर्षित्वं' अपराधिषु क्षान्तिः, 'स्वकर्मदृष्ट-†शास्त्रित्वं' प्रजापालनरूपं स्वकर्म सर्वायुधविषयं दृष्टशास्त्रञ्च यो जानाति, तस्य भावः। 'कृतित्वं' पाण्डित्यं, 'दीर्घदर्शिता' शास्त्रचक्षुषा सुदूरदेशकालदर्शनशीलत्वं। स्पष्टमन्यत् ॥ १० ॥

अपरञ्च, जितेति। एते अनन्तरोक्ता गुणाः विजिगीषोर्विजिगीषुत्वसम्पादका भवन्तीति भावः। श्लोकार्थः सुगमः॥ ११ ॥

उत्साहगुणस्यैव प्राधान्यं दर्शयन्नाह, सर्वैरिति। 'सर्वैः' अनन्तरोक्तैः, 'गुणैः', 'विहीनोऽपि', 'यः प्रतापवान्' 'यः' प्रतापयुक्त उत्साहविशेषशाली, 'सः', एव 'राजा', प्रजारञ्जनात्। यतः '‡प्रतापयुक्तात्', राज्ञः, 'सिंहात् मृगा इव', 'परे' शत्रवः इतरे जना वा, 'त्रस्यन्ति' बिभ्यति ॥ १२ ॥

एतदेव समर्थयन्नाह, प्रतापेति। 'प्रतापसिद्धौ' सकलशत्रुविकर्त्तनजनितं यशः प्रतापः, तस्य सिद्धौ सत्यां। 'उत्थानयोगेन' सततविग्रहोद्योगयोगेन। स्पष्टमवशिष्टं ॥ १३ ॥

विजिगीषुलक्षणमभिधातुमाह, एकेति। 'एकार्थाभिनिवेशित्वं' एकार्थे भूहिरण्यादिरूपे अभिनिवेशित्वं आत्मसात्करणाग्रहात् दयोरपि यत्नः, तदेव §'अरिलक्षणं', तौ परस्परमरी भवतः। तयोरे-

---

* सदेति मु०। † शास्त्रत्वमिति मु०।
‡ प्रतापयुक्ता त्रस्यन्ति परान् सिंहा मृगानिवेति मु०। § अविलक्षणमिति मु०।

को 'दारुणः', अपरः सुखोच्छेद्यश्च भवति। 'दारुणस्तु प्रभुः' विजिगीषुगुणशाली भवति। आत्मनो दुरुच्छेद्यता विजिगीषुणा सम्पादनीयेति भावः ॥ १४ ॥

सुखोच्छेद्यं प्रभुं दर्शयन्नाह, लुब्ध इति। 'लुब्धः' अर्थलोभात् दानशक्तिरहितः, दानाभावे प्रकृतयो विरज्यन्ते। 'क्रूरः' अतितीक्ष्णदण्डः, स च उद्वेजनीयो भवति। 'अलसः' निरुद्योगः, तस्य प्रकृतयोऽपि निरुद्योगा भवन्ति। 'असत्यः', असत्यशीलः, तच्छीलाः प्रकृतयो भवन्ति इत्यर्थः। 'भीरुः' शौर्य्यरहितः, स च सङ्ग्रामासमर्थो भवति। 'अस्थिरः', स्थितेरहितत्वात् स च प्रकृतिभिर्न सज्यते। 'मूढः' निर्विवेकः, स त्वकिञ्चनकारी भवति। 'योधावमन्ता' युद्धविशारदशूरपुरुषावमानकृत्, स च योधविमुक्तः सुखेनैवोच्छिद्यते ॥ १५ ॥

विजिगीषोः, अरेः, मित्रस्य च लक्षणानि अभिहितानि, इदानीं विजिगीषोः यातव्यं प्रति यियासोः अग्रतः पश्चादासन्नव्यवहितभेदेनारिमित्रादीनां संज्ञान्तराणि व्यवहारार्थमभिधातुमाह, *अरिमित्रमिति। 'अरेः' अनन्तरोक्ताया विजिगीषोर्भूम्यनन्तररूपदिग्भागेषु व्यवस्थिताया अरिप्रकृतेः, 'मित्रं' अनन्तरोक्तं भूम्येकान्तरस्थि 'अरिमित्रं' विजिगीषोर्भूम्यनन्तरस्यैकानन्तरं। 'अतः परं' अ मित्रात्परं, 'मित्रमित्रं' विजिगीषोर्भूम्येकान्तररूपमित्रस्यापि भूम्येकान्तररूपं। 'तथाऽरिमित्रमित्र', 'च', विजिगीषोर्भूम्यनन्तरस्यारेर्भूम्येकान्तररूपारिमित्रस्य भूम्येकान्तरं। एता अपि तिस्रः प्रकृतयः 'विजिगीषोः', 'पुरः' अग्रतः, '†स्मृताः' प्रोक्ता गुरुभिः ॥ १६ ॥

पश्चाद्व्यवस्थितानां तेषां संज्ञान्तराण्याह, पार्ष्णिग्राह इति। 'पार्ष्णिग्राहः' पश्चात् स्थितो विजिगीषोर्भूम्यनन्तरश्च। 'आक्रन्दस्तदनन्तरं' तत्पश्चाद्वर्त्ती विजिगीषोर्भूम्येकानन्तरः। 'अनयोः' पार्ष्णिग्राहाक्रन्दयोः, पश्चात् 'आसारावेव' मित्रं। तद्यथा पार्ष्णिग्राहस्य च आ-

* अरिमित्रमिति मु०। † स्थिता इति म०।

सारः स पार्ष्णिग्राहासारः, एवं आक्रन्दासारः, इति पश्चाद्वर्त्तिनो राजानश्चत्वारः। पुरस्तात् पञ्च तदग्रे विजिगीषुः, इति दशराजक-मिदं 'मण्डलं', 'विजिगीषोः', सम्बन्धि भवति। आसामेव प्रकृतीनां अग्रपश्चाद्भावभेदेन व्यपदेशभेदः। तत्राग्रवर्त्तिनोऽरिव्यपदेश एव। पश्चाद्वर्त्तिनस्तु अरित्वेऽपि पार्ष्णिग्राहव्यपदेशः। 'एताः प्रकृतयो मूलं' इति [७ । १५६ ।] मनुवचनव्याख्यायां कुल्लूकभट्टः। 'अन्यथाष्टौ स-माख्याताः, तद्यथा अग्रतोऽरिभूमीनां मित्रमरिमित्रं मित्रमित्रमरि-मित्रमित्रञ्चेति। एवञ्च चतस्रः प्रकृतयो भवन्ति, पश्चाच्च पार्ष्णिग्राहः, आक्रन्दः पार्ष्णिग्राहासारः आक्रन्दासार इति चतस्रः, एवमष्टौ प्रकृतयो भवन्ति' इति ॥ १७ ॥

अरिप्रकृतेरेव बलापेक्षं संज्ञान्तरमभिधातुमाह, अरेश्चेति। 'अरेः' यातव्यस्यापि, 'भूम्यनन्तरं' भूम्यनन्तररूपो रिपुः, 'मध्यमः', नाम, 'विजिगीषोः', 'च' अपि, रिपुरेव भवति। उभयोररिभा-वादरित्वमित्रत्वयुक्तः, स च मध्यमः 'संहतयोः' एकीभूतयोस्तयो-ररिविजिगीष्वोः, 'अनुग्रहे' कोषदण्डाभ्यामुपकारे, 'समर्थः' प्रभुः, तदपेक्षया न्यूनशक्तित्वात्। तयोरेव 'व्यस्तयोः' भिन्नयोः, निग्रहे दण्डने च प्रभुः, एकैको मध्यमस्य युद्धे समर्थो न भवतीति। अत्र 'मध्यमस्य प्रचारञ्च विजिगीषोश्च चेष्टितं' इति [७ । १०५ ।] मनु-वचनव्याख्याने कुल्लूकभट्टेनैवं कृतं 'अरिविजिगीष्वोर्यो भूम्यनन्तरः संहतयोरनुग्रहे समर्थो निग्रहे चासंहतयोः समर्थः स मध्यमः तस्य प्रचारं चिन्तयेत्' इत्यादि ॥ १८ ॥

मण्डलाद्बहिरुदासीनप्रचारमभिधातुमाह, *मण्डलादिति। 'एते-षां' विजिगीष्वरिमध्यमानां, 'मण्डलात्', भूभागात्, 'बहिः' सान्तरो विजिगीषोर्भूम्यनन्तरः, 'उदासीनः', नाम, 'बलाधिकः' बलापेक्षया भवति। स च 'संहतानां' तेषामरिविजिगीषुमध्यमानां, 'अनुग्रहे'

* मण्डलले हि चैतेषामिति म०।

साहाय्यदाने, 'व्यस्तानां' तेषां, 'बधे' बधदण्डने, 'च', 'प्रभुः' पूर्ववत् समर्थः। अत्र 'उदासीनप्रचारञ्च' [७।१५५] इति मनुवचनं, 'न तथा अरिविजिगीषुमध्यमानां यः संहतानामनुग्रहे समर्थो निग्रहे चासंहतानां समर्थः सं उदासीनस्तस्य प्रचारं चिन्तयेदिति' तद्व्याख्यानञ्च॥ १९॥

विजिगीष्वरिमध्यमोदासीनानां मूलप्रकृतित्वमाह, मूलप्रकृतयस्त्विति। 'एताः' अनन्तरोक्ताः विजिगीष्वरिमध्यमोदासीनरूपाः, 'चतस्रः' चतुःसङ्ख्याकाः, 'मूलप्रकृतयः' अपरासां प्रकृतीनाममात्यादीनां मूलभूताः प्रकृतयः, कारणप्रयोगसन्निहितत्वात्, *'प्रकीर्त्तिताः' कथिताः, †'एतत्', 'चतुष्कं' चतुर्भेदभिन्नं, 'मण्डलं', ‡'तन्त्रकुशलः' नीतितन्त्रप्रवीणः, 'मयः' मयनामाचार्य्यः, 'आह',। एतदुक्तं मनुनापि 'एताः प्रकृतयो मूलं मण्डलस्य समासतः' इति [७।१५६]॥ २०॥

विजिगीष्वरिमित्रपार्ष्णिग्राहमध्यमोदासीनानां षण्णां षड्राजकमण्डलत्वं पुलोमेन्द्राभ्यामुक्तमित्याह, विजिगीषुरिति। स्पष्टं॥ २१॥

विजिगीषोर्दशराजकमण्डलस्योदासीनमध्यमसहितस्य द्वादशराजकमण्डलत्वं उशनःसम्मतमित्याह, उदासीन इति। प्रतीतं॥ २२॥

अनन्तरोक्तद्वादशराजकमण्डलस्यैकैकस्य मित्रामित्रसहितस्य त्रिदशत्रिकरूपषट्त्रिंशद्राजकमण्डलत्वं मयाचार्य्येण पुनः कथितमित्याह, द्वादशानामिति। 'षट्त्रिंशत्कं' द्वादशत्रिकं षट्त्रिंशद्भवन्तीति। 'ते च' द्वादश नरेन्द्राः। 'ते च' मित्रामित्रे एकैकशो मित्रामित्ररूपेण चतुर्विंशतिरिति 'षट्त्रिंशत्कं', मण्डलं, 'पुनर्मयः', आह॥ २३॥

अनन्तरोक्तानां द्वादशमण्डलनरेन्द्राणां पृथक् प्रत्येकं अमात्याद्याः पञ्च प्रकृतयो भवन्ति इति मानवशिष्याणां मतमाह, द्वादशानां नरेन्द्राणां पञ्चेति। 'द्वादशानां नरेन्द्राणां' द्वादशमण्डलनरेन्द्राणां, 'पृथक् पृथक्' प्रत्येकं, 'पञ्च पञ्च', भवन्ति। 'अमात्याद्यास्तु' अमात्य-

---

* परिकीर्त्तिता इति मु०। † आहैवेति मु०। ‡ मन्त्रकुशल इति मु०।

राष्ट्रदुर्गकोशदण्डाख्याः, 'प्रकृतीः', 'आमनन्ति' विगणयन्ति, 'मानवाः' मनुशिष्याः । स्पष्टमन्यत् ॥ २४ ॥

ततश्च किं भवतीत्याह, मौला इति । 'मौलाः' मूलभूताः, 'द्वादश' द्वादशसङ्ख्याकाः, 'याः', स्वामिप्रकृतयः, 'तथा अमात्याद्याः याश्च', गुणकस्वरूपाः पञ्च, ताः 'एताः', *"द्व्यधिका सप्ततिः' द्विसप्ततिसङ्ख्याका प्रकृतयः, एतत् 'सर्वं प्रकृतिमण्डलं', इति मानवा मन्यन्ते। एतदुक्तं मनुना "अमात्यराष्ट्रदुर्गार्थदण्डाख्याः पञ्च चापराः । प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः ॥ [७ । १५७] इति । मनुवचनव्याख्याने कुल्लूकभट्टेनैवं कृतं । 'आसां मूलप्रकृतीनां चतसृणां अष्टानां शाखाप्रकृतीनां उक्तानां एकैकस्याः प्रकृतेः अमात्यदेशदुर्गकोषदण्डाख्याः पञ्च द्रव्यप्रकृतयो भवन्ति, एताश्च पञ्च द्वादशानां प्रत्येकं भवन्त्यो द्वादशगुणजाताः षष्टिरेव द्रव्यप्रकृतयो भवन्ति, तथा मूलप्रकृतिभिश्चतसृभिः शाखाप्रकृतिभिश्चाष्टाभिः सह संक्षेपतो द्विसप्ततिप्रकृतयो मुनिभिः कथिताः' इति ॥ २५ ॥

बृहस्पतिसम्मतमष्टादशराजकं मण्डलमभिधातुमाह, संयुक्तास्विति । 'उभयारिः', विजिगीषुयातव्ययोर्भूम्यनन्तरं, एकार्थाभिनिवेशमरिलक्षणमिति वचनात् । 'तथा सुहृत' एवं उभयमित्रः, 'अरिमित्राभ्यां संयुक्ताः', षट् राजानो भवन्ति, 'मौला द्वादश राजानः', एवमष्टादशराजकमण्डलं गुरुर्मन्यते ॥ २६ ॥

एतद्राजमण्डलं अष्टोत्तरशतं कवयो मन्यन्ते इत्याह, अष्टादशानामिति । अनन्तरोक्तानां 'अष्टादशानामेतेषां', 'पृथक् पृथक्' एकैकस्य, 'अमात्याद्याः' अमात्यराष्ट्रदुर्गकोषदण्डमित्ररूपाः षट् राजानो भवन्ति । एवं षड्गुणिताष्टादशकं अष्टोत्तरशतं भवति । स्पष्टमन्यत् ॥ २७॥

चतुःपञ्चाशद्राजकं मण्डलं विशालाक्षसम्मतमभिधातुमाह, अष्टेति । मतान्तराणि सर्वाणि देशकालप्रजापेक्षया सार्थकानि द्रष्ट-

* सप्ततिश्चाधिका इति मु० ।

णानि। अस्मिन् मते उक्ताष्टादशानां प्रत्येकस्य 'अमात्याद्याः', अमात्यराष्ट्रदुर्गाणीति त्रयं त्रयं भवति। तेन गुणिताश्चतुःपञ्चाशत् सम्पद्यन्ते। एतन्निगुणितं मण्डलं विशालाक्षमतं ॥ २८ ॥

चतुर्विंशत्यधिकत्रिशतमण्डलं केषाञ्चिन्मतमाह, चतुःपञ्चाशतामिति। अनन्तरोक्तानां 'चतुःपञ्चाशतां राज्ञां', 'पृथक् पृथक्' एकैकस्य, 'अमात्याद्याः', षट् राजानो भवन्ति। तेनैतदपरमण्डलं चतुर्विंशत्यधिकत्रिशतमितं भवति ॥ २९ ॥

अपरे चतुर्दशराजकं मण्डलं मन्यन्त इत्याह, सप्तप्रकृतिकमिति। समूहवाचित्वान्मण्डलशब्दस्यैतदभिन्नं 'मण्डलं' समूहं, 'परिचक्षते'। स्पष्टमन्यत् ॥ ३० ॥

मण्डलत्रिकषट्कपक्षावाह, मण्डलत्रिकमिति। पूर्व्वार्द्धं सुगमं। *'एते' विजिगीष्वरिमध्यमाः 'पृथक्' एकैकशः, 'मित्रयुक्ताः', षट्-सम्पद्यन्ते इत्यर्थः ॥ ३१ ॥

षट्त्रिंशत्पक्षमाह, अमात्याद्या इति,। 'भूपतेः' अनन्तरोक्तभूपतिषट्कस्य, 'एकैकस्य', 'अमात्याद्याः प्रकृतयः', षट् भवन्ति। तेन षट्त्रिंशत्सङ्ख्या सम्पद्यते ॥ ३२ ॥

एकविंशतिराजकं मण्डलमपरनयवित्सम्मतमित्याह, सप्तप्रकृतिका इति। सप्तानामेकैकस्य 'विजिगीष्वरिमध्यामाः', त्रयो भवन्ति। तेन एकविंशतिसंख्या भवति ॥ ३३ ॥

अष्टचत्वारिंशत्कं मण्डलमभिधातुमाह, चत्वार इति। 'मौलाः' विजिगीष्वरिमध्यमोदासीनाः, 'चत्वारः पार्थिवाः', 'पृथङ्मित्रैः सहाष्टकं', पृथक् पृथक् मित्रसहिताः सन्तः अष्टकं भवति। तदेव 'अमात्यादिभिः' पूर्व्वोक्तैः षड्भिः प्रकृतिभिः सह, सङ्गुणितमित्यर्थः। 'जगत्यक्षरसम्मितं' द्वादशाक्षरनिबद्धजगतीच्छन्दोगताष्टचत्वारिंशदक्षरसम्मितं भवतीति ॥ ३४ ॥

---

* एतैरिति मु०। † पश्चिमे चेति मु०।

द्वादशराजकमण्डलमभिधातुमाह, विजिगीषोरिति। व्याख्यातपूर्वं ॥ ३५ ॥

षष्टिराजकं मण्डलमभिधातुमाह, द्वादशानामिति। श्लोकव्याख्यानं सुप्रतीतं ॥ ३६ ॥

त्रिंशत्काभिधं मण्डलमभिधातुमाह, अरिमित्रे इति। 'नेतुः' विजिगीषोः, 'पुरः' अग्रतः, 'अरिमित्रे' भूम्यनन्तरभूम्येकान्तरौ द्वौ, '*पश्चिमे ते च' पश्चिमौ च, तथैव भूम्यनन्तरभूम्येकान्तरसंज्ञौ द्वौ, विजिगीषुणा सह पञ्चकं भवति। 'तेषां पृथक् अमात्याद्याः', षट् भवन्ति। एवं गुणिते त्रिंशत्सङ्ख्या सम्पद्यते ॥ ३७ ॥

यथा विजिगीषोस्तथा शत्रोरनन्तरोक्तन्यायेन पञ्चकं त्रिंशत्कञ्चेति योज्यमित्याह, अरेरप्येवमेवेतीति। स्पष्टं ॥ ३८ ॥

परासरसम्मते द्वे प्रकृती न्याय्ये इत्याह, द्वे एवेति। 'न्याय्ये' न्यायोपपन्ने, 'अभियोक्ता प्रधानः' विजिगीषुरभियोक्ता, '†तथाऽन्याऽभियुज्यते'। स्पष्टं ॥ ३९ ॥

एकायाः प्रकृतेरिष्टत्वमाह, परस्परेति। 'परस्पराभियोगेन' यथा विजिगीषुणाऽरिः एवं अरिणाऽपि विजिगीषुरभियुज्यते। एवमेव विजिगीषुरभियोक्ता, 'तथाऽरेरपि'। य एवारिः सएव विजिगीषुः इत्यतः कारणात् एकैव प्रकृतिरित्येकप्रकृतिकमिदं मण्डलमित्यन्ये ॥ ४० ॥

उपसंहरन्नाह, इतीति। 'परिचक्षते,' पूर्वाचार्य्या इत्यर्थः। कामन्दकिनात्मनो बहुश्रुतत्वख्यापनार्थं अयं ग्रन्थविस्तरदोषोऽपि न गणितः इति। उत्तरार्द्धं सुगमं ॥ ४१ ॥

एतदेव समर्थयन्मण्डलं वृत्तत्वेन रूपयति, अष्टशाखमिति। 'चतुर्मूलं' विजिगीष्वरिमध्यमोदासीनरूपाणि चत्वारि राजमण्डलमूलानि यस्य

* पश्चिमे चेति मु०।

† तथा न्याय्योऽभियुज्यत इति मु०।

स तं। 'अष्टशाखं' उक्तानां चतुर्णां मण्डलानां प्रत्येकमरिमित्रे इत्यष्टौ राजानोऽष्टौ शाखा यस्य स तं। 'षष्टिपत्रं', विजिगीष्वादिद्वादशान्तपाणां प्रत्येकममात्याद्याः पञ्च पञ्च प्रकृतय इति द्वादशानामित्यनन्तरोक्त [२५] श्लोकोक्ता याः षष्टिसंख्याः प्रकृतयः ता एव पत्राणि यस्य स तं। 'द्वये स्थितं' दैवं पुरुषकारं चेति द्वयं आधारभूतं तस्मिन् स्थितं। 'षट्पुष्पं' सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः षट् गुणाः सन्ति ते पुष्पाणि यस्य स तं। 'त्रिफलं' उक्तषाड्गुण्यस्य फलभूता उत्तमा मध्यमा अवराः क्षयस्थानवृद्ध्यादयो ये लाभास्तान्येव फलानि यस्य स तं। एवं मूलमण्डलवृत्तं 'यो जानाति स नीतिवित्' ॥ ४२ ॥

मण्डले षाड्गुण्यप्रयोगमभिधातुमाह, पार्ष्णिग्राह इति। 'विजिगीषोः' यातव्यं प्रति गच्छतः, 'पार्ष्णिग्राहः' पार्ष्णिग्रहणेन विघ्नविधायी पृष्ठतो भूम्यनन्तरः, '*तदासारः' पार्ष्णिग्राहस्यैव भूम्येकान्तरः, एतौ द्वावपि शत्रुमित्रे प्रकीर्त्तिते। एते शत्रोर्यातव्यस्य मित्रे भवतः। 'आक्रन्दः' पार्ष्णिग्राहस्य भूम्यनन्तरः, विजिगीषुणा पार्ष्णिग्राहविग्रहणार्थमाक्रन्द्यते आहूयते इति। 'तदासारः', आक्रन्दस्य भूम्येकान्तरः, आपदि परित्राणार्थमासरतीति। द्वावेतावपि 'विजिगीषोः', यातव्यं प्रति उदाहृते मित्रे भवतः इत्यनुवर्त्तते ॥ ४३ ॥

अपरञ्च, पुरो यायादिति। 'पुरः' अग्रतः, 'यायात्', यातव्यं प्रति, 'विगृह्यैव' विग्रहं कारयित्वा, 'मित्राभ्यां' आक्रन्दतदासाराभ्यां, 'पश्चिमौ' पृष्ठस्थौ, 'अरी' पार्ष्णिग्राहमित्रे। 'पश्चिमाविव' पृष्ठस्थावरीव, 'पूर्वाभ्यां' मित्रमित्रमित्राभ्यां, 'अरिं', यातव्यं अरिमित्रमपि यातव्यं प्रति यायादित्यर्थः ॥ ४४ ॥

किञ्च, अरिमित्रस्येति। 'अरिमित्रस्य' यातव्यमित्रस्य, 'मित्रं' यत् तस्य पुरोवर्त्ति तच्च 'कृतकृत्येन' साधितमद्दोपकारेण, 'भूयसा' उपचितशक्तिना, 'संलभ्य' निरुद्धचेष्टं कृत्वा गन्तव्यमित्रं स्तम्भितं कृत्वा,

* तथाऽऽसारः इति मु॰।

'उभयमित्रेण' उदासीनेन, विशेषेण किमित्यसौ लभ्भयति इति चेत् विजिगीषुणा कृतकृत्यः कृत इत्येवं कत्वा, 'पश्चादुच्छेत्तरेश्वरः', नात्येति इत्यर्थः ॥ ४५ ॥

एतदेव समर्थयन्नाह, आक्रन्देनेति। 'आक्रन्देन' अनन्तरोक्तेन, 'आत्मना च', 'पार्ष्णिग्राहं' मध्यस्थं, 'प्रपीडयेत्', 'आक्रन्दासारभाजिना', 'आक्रन्देन', 'तदासारं' पार्ष्णिग्राहासारं, प्रपीडयेदित्यनुवर्त्तते ॥ ४६ ॥

पुरस्तात् विधेयमभिधातुमाह, मित्रेणेति। 'मित्रेण' पुरस्तादवस्थितेन, 'आत्मना' स्वेन, 'एव च', 'रिपोः', यातव्यस्य, 'उद्धरणं' उच्छेदनं, 'कुर्वीत', '*मित्रेण सखमित्रेण' स्वीयमित्रेण सह वर्त्तमानेनारियातव्येन, 'रिपुमित्रं' यातव्यमित्रं, 'प्रपीडयेत्', ॥ ४७ ॥

अपरञ्च, अरिमित्रस्येति। 'अरिमित्रस्य मित्रस्य' यातव्यमित्रमित्रस्य, 'प्रपीडनं', 'पृथिवीपतिः', 'कुर्वीत', 'उभयमित्रेण' पूर्वोक्तेन, 'मित्रमित्रेण' विजिगीषुमित्रमित्रेण 'च', प्रतीतमवशिष्टं ॥ ४८ ॥

किञ्च, अनेनेति। 'अनेन' अनन्तरोक्तेन, 'क्रमयोगेन', 'सदोत्थितः' सर्वदोद्यमशाली, 'अहितं' सर्वदापकारिणं 'शत्रुं' भूम्यनन्तरं 'मित्राणामन्तरन्तरां' मित्रभूम्यनन्तरं शत्रुमित्रमित्यर्थः, 'पीडयेत्', ॥ ॥ ४९ ॥

रिपुपीडने फलमाह, पीड्यमान इति। 'उभयतः' सन्दंशन्यायेन एकतो विजिगीषुणा, अन्यतो विजिगीषुमित्रैः क्रमोत्क्रमं व्यवस्थितैः, 'मनीषिभिः' प्राज्ञैः, 'पीड्यमानः', 'रिपुः', 'उच्छेदमायाति' उच्छिन्नो भवति, 'तद्वशे' विजिगीषुवशे '†वा', 'अवतिष्ठते' ॥ ५० ॥

स्वपरोभयमित्रस्यात्मसात्कारणार्थमाह, ‡सर्वोपायैरिति। 'सर्वोपायैः' सामोपदानादिभिः, 'सामान्यं' शत्रोरात्मनः साधारणं, 'मित्रं'

---

* मित्रेण हि सभमित्रेणेति मु०। † चेति मु०।
‡ सर्वोपायेनेति मु०।

उक्तलक्षणां, 'आत्मसात्' आत्मन एवासाधारणां 'कुर्वीत',। 'हि' यस्मात् *'सुखोच्छेद्याः', निःसहायत्वादित्यर्थः, 'शत्रवः', 'मित्रात्', 'उच्छिन्नाः' विश्लेषिताः, 'भवन्ति', इति ॥ ५१ ॥

अरेरपि मित्रतापादनार्थमभिधातुमाह, †कारणैरेवेति। 'कारणैः' हेतुभिः, उपकाराख्यैः अपकाराख्यैश्च। 'मित्राणि', 'तथा', 'शत्रवः', 'जायन्ते',। शेषार्द्धं स्पष्टं ॥ ५२ ॥

विजिगीषुर्न केवलं मुख्यानेव जगति मित्रत्वेन स्थापयेत् क्षुद्रकानपीति दर्शयन्नाह, प्राधान्येनेति। 'प्राधान्येन' मुख्यतया, 'सर्वत्र' पत्तनग्रामादिषु दशसु स्वीयजनपदे यथायोगं परकीयजनपदेऽपि 'सर्वाः च प्रजाः' समस्ता वर्णाश्रमादिलक्षणाः, 'संसर्जयेत्' सामादिभिरानुकूल्येनानुरञ्जयेत्। "अनुरागे हि सार्वगुण्यं" इतिवचनात् 'तासां संसर्जनात्' सर्वप्रजाजनानुरञ्जनात् 'राजा' विजिगीषुः, 'सर्वाङ्गीं' सर्वावयवसम्पन्नां 'श्रियं' विभूतिं 'अश्नुते' भुनक्ति ॥ ५३ ॥

विजिगीषोर्मण्डलसाधनं समर्थयन्नाह, दूरेचरानिति। 'दूरेचरान्' अतिव्यवहितान्, ‡'मण्डलिनः' अनन्तरोक्तद्वादशराजकादीन्, तथाऽन्यान् बहिर्भूतांश्च, 'दुर्गवासिनः' आटविकान्, तथाऽरिमित्रादीनपि 'मित्रीकुर्वीत', यतः, 'तत्प्राणाः' मित्रप्राणाः, 'इह' जगति 'मण्डलं' अनन्तरोक्तं, 'साधयन्ति' ॥ ५४ ॥

सर्वधर्ममभिधातुमाह, चलेदिति। 'ऊर्जितबलः' शक्तित्रयसम्पन्नः, 'मध्यमः', अनन्तरोक्तः 'विजिगीषया', 'चलेत्' अभियायात्, विजिगीषुः 'तदा' तदानीं, 'एकीभूय' मिलित्वा, 'अरिणा', यातव्येन सह कृतसन्धिः, 'तिष्ठेत्', 'अशक्तः', चेत् '§सन्धिना', हेतुभूतेन 'नमेत्' कोषादिभिरुपनमेत् ॥ ५५ ॥

---

* सुखच्छेद्या इति मु०। † कारणेनैवेति मु०।
‡ माण्डलिकानिति मु०। § सन्धिमानिति मु०।

उदासीने विजिगीषति माण्डलिनां सर्वधर्मेणावस्थानमाह, *विजिगीषत्युदासीन इति। 'उदासीने', विजिगीषया 'विजिगीषति', सति, 'सर्वे मण्डलिनः' विजिगीष्वरिमध्यमाः, सह मिलित्वा, 'सर्वधर्मेण', वक्ष्यमाणलक्षणेन, 'सह', 'तिष्ठेयुः', 'अशक्तयः', 'प्रणमेयुः', आत्मरक्षार्थं ॥ ५५ ॥ [क्रोडः] ॥ १ ॥

उक्तक्रमेण सन्धिधर्मं व्याख्यातुमाह, †समुत्पन्नेष्विति। 'कृच्छ्रेषु' महाव्यसनेषु, 'समुत्पन्नेषु' 'सम्भूय' एकीभावमुपेत्य, 'स्वार्थसिद्धये', 'आपत्प्रतरणं सम्यक्', कुर्वन्ति यत्तदिति वाक्यशेषः, 'सर्वधर्म इति स्मृतः' तत् सर्ववृत्तमिति स्मृतं ॥ ५५ ॥ [क्रोडः] ॥ २ ॥

अरिप्रकारकथनपूर्वकं तत्र विजिगीषोर्वृत्तमभिधातुमाह, सहज इति। 'सहजः' स्वकुलोत्पन्नो दायादादिः, 'कार्यजः' एकार्थाभिनिवेशित्वात् कार्ये जायते इति, 'द्विविधः शत्रुरुच्यते' ॥ ५६ ॥

शत्रौ विजिगीषुवृत्तस्य चातुर्विध्यमभिधातुमाह, उच्छेदापचयाविति। 'उच्छेदः' स्वभूमेः परित्यजनं, 'अपचयः' शक्तिभिर्वियोजनं, ‡'पीडनकर्षणे', वक्ष्यमाणलक्षणे, 'काले' अनुकूलसमये, 'इति' एतत्, 'विद्याविदः' दण्डनीतिज्ञाः, 'शत्रौ', विषयभूते 'वृत्तं' शीलं, 'चतुर्विधं' चतुःप्रकारं, विजिगीषोरित्यर्थः, 'प्राहुः' ॥ ५७ ॥

कर्षणपीडनयोः स्वरूपमभिधातुमाह, रेचनमिति। 'रेचनं', 'कोशदण्डाभ्यां' कोशदण्डतनूकरणं। 'महामात्रः' प्रधानः, 'परं' कर्षणादधिकं महामात्रवधादिकं। स्पष्टमन्यत् ॥ ५८ ॥

उच्छेदलक्षणमभिधातुमाह, समाश्रयविहीन इति। 'समाश्रय-

---

* विजिगीषत्युदासीने सर्वे मण्डलिनः सह।
सर्वधर्मेण तिष्ठेयुः प्रणमेयुरशक्तयः ॥ ५५ क्रोडः ॥ १ ॥

† समुत्पन्नेषु कृच्छ्रेषु सम्भूय स्वार्थसिद्धये।
आपत्प्रतरणं सम्यक् सर्वधर्म इति स्मृतः ॥ ५५ क्रोडः ॥ २ ॥
इदं श्लोकद्वयं मु॰ पु॰ नास्ति।

‡ पीडनं कर्षणमिति मु॰।

'नितिं' दुर्नीतिव्यवस्थितं, 'भूम्यनन्तरः' विजिगीषुभूम्यनन्तर इति वरोऽविरोधः ॥ ५८ ॥

[illegible]रादिः सुखोच्छेद्यो भवति तामाह, *लुब्ध इति। एवम्भूत-[illegible] रिरनन्तरः शत्रो रिपुः सदा सुखोच्छेद्यो भवति ॥ ५९ ॥ [क्रोडः] ॥

कर्षणपीडनयोर्विषयमभिधातुमाह, †कर्षणमिति। 'कर्षणं' तनू-करणं, 'पीडनं' कर्षणादप्यधिकदुःखोत्पादनं महामात्यवधादिकं, 'काले', सर्वथानुकूले, 'कुर्वीत', विजिगीषुरित्यर्थः। 'आश्रयमानिनः' समाश्रयाभिमानिनः। उत्तरार्द्धं स्पष्टं ॥ ६० ॥

पूर्वोक्तः सहजो रिपुः सर्वथा उच्छेद्य इत्येवं दर्शयन्नाह, विभीष-णस्येति। 'सूर्यसुतस्य' सुग्रीवस्य, विभीषणसुग्रीवयोः सोदर्यौ राव-णवाली सहजौ रिपू। 'सर्वतन्त्रापहारित्वात्' मन्त्रराजादिकं सर्व-तन्त्रं तदपहरणशीलत्वात् हेतोः, निजो रिपुरुच्छेद्य एव ॥ ६१ ॥

सोदर्यः कथमुच्छेद्यो भवतीति दर्शयन्नाह, छिद्रमिति। 'छिद्रं' र-न्ध्राण्येषित्यादि, '‡मर्म' यत्राभियुक्तमात्रो म्रियते। '§वीर्यं' बलवत्तां, 'निजो रिपुः' सोदर्यादिः। असौ 'अन्तर्गतः' अन्तःस्थितः, 'दहति'। अत उच्छेद्य एव। स्पष्टमन्यत् ॥ ६२ ॥

न केवलं शत्रुविशेष एवोच्छेद्यः, मित्रविशेषस्योच्छेद्यताऽभीष्टेति दर्शयन्नाह, वर्त्तते इति। 'यत्', 'मित्रं', 'उभयात्मकं', अर्थादरि-विजिगीष्वोर्मध्यवर्त्ति भूत्वा, '‖अरिपक्षपातेन', 'वर्त्तते' विश्वस्ते विजिगीषौ अपकरोमीति कृताध्यवसायं भवति, 'तदुच्छिन्द्यात्', 'वज्रीव त्रिशिरसं' इन्द्र इव त्रिशिरोनामकदेवविशेषं, 'कृतत्वरः' अकृतविलम्बः। त्रिशिरा नाम देवविशेषो दानवारिः, इन्द्रस्यामित्रं,

---

* लुब्धः क्रूरोऽलसोऽत्यन्तप्रमादी भीरुरस्थिरः।
मूढो योधावमन्ता च सुखोच्छेद्यो रिपुः सदा ॥ ५९ ॥ क्रोडः।

† कर्षणमिति मु०। ‡ कर्म चेति मु०। § वित्तमिति मु०।
‖ पक्षपातेनेति मु०।

स दानवाधिपत्ये सुतरां स्निग्ध इति वज्रिणा निहत इति पौराणिकी कथा ॥ ६३ ॥

कार्यवशादरेरप्युपचयो विधेय इति दर्शयन्नाह, बलिनेति। 'बलिना' बलवता, '*द्विषता' शत्रुणा, 'विगृहीतस्य' विग्रहकारिणः, 'कृच्छ्रवर्त्तिनः' सङ्कटापन्नस्य, 'शत्रोः', †'उपचयं कुर्वीत', 'आत्मोच्छित्तिविशङ्कया', भूम्यनन्तरादरावुच्छिन्ने बलिर्भूम्यन्तरो भवति बलवत्त्वात्। विजिगीषुमप्युच्छिन्द्यात् इति शङ्कया, भूम्यनन्तररूपेऽरावप्युपचयः कार्य एवेति ॥ ६४ ॥

एतदेव समर्थयन्नाह, यस्मिन्निति। 'यस्मिन्' भूम्यनन्तररूपेऽरौ, 'एनं' स्वशत्रुं, 'स्वगोचरं कुर्वीत' भृत्यभावे स्थापयेत्। स्पष्टमवशिष्टं ॥ ६५ ॥

अपरञ्च, वंशागत इति। 'वंशागतः' स्वकुलप्रभवः, 'यो रिपुः', 'विचलेत्' एकार्थाभिनिवेशित्वात् व्यभिचरति, यतः सः 'दुरवग्रहः' कथमप्यात्मसात्कर्तुं न याति, 'तस्य संशमनाय' तद्दमनार्थं, 'तत्कुलीनं' तद्दायादं, 'आशु समुन्नयेत्' सत्वरमुत्थापयेत्, अयमेवैतत् प्रतीकार इति ॥ ६६ ॥

किञ्च, विषमिति। 'विषं', 'विषेण' स्थावरविषेण, 'व्यथते' निर्वीर्य्यं क्रियते नान्येन, 'वज्रं वज्रेण भिद्यते', 'दृढसारेण' परिचितबलेन पोषितेनेत्यर्थः। शेषः सुगमः ॥ ६७ ॥

अपरञ्च, मत्स्य इति। विभीषणासूचितमर्म्मप्रहारैरावण उच्छिन्न इति भावः। अवशिष्टं प्रतीतमिति ॥ ६८ ॥

द्वादशमण्डलाराधनायाह, यस्मिन्निति। 'यस्मिन् कर्मणि कृते', 'मण्डलसंक्षोभः' मण्डलस्य द्वादशराजकरूपस्य संक्षोभोऽमर्षादक्षमा भवति, 'मेधावी', विजिगीषुः, 'तन्न कुर्य्यात्', 'प्रकृतीः' एकादशापि

---

* द्विषत इति मु०। † अपचयमिति म०।

राजप्रकृतीः, तदीयाश्च अमात्यादिकाः प्रकृतीः, 'अनुरञ्जयेत्', एवं कृते सकलमण्डलेशो भवति ॥ ६९ ॥

स्वपरविभागेन प्रकृतिषूपायप्रयोगमाह, साम्नेति। 'आत्मीयाः' मित्रादिकाः प्रकृतीः, 'साम्ना' सन्धिना, 'दानेन', 'मानेन' यथोचितपूजया, 'अनुरञ्जयेत्', *'परकीयास्तु' शत्रुतन्मित्रादिकाः प्रकृतीः, 'भेददण्डाभ्यां', 'दारयेत्' हन्यात् ॥ ७० ॥

मित्रादीनामप्यात्मीयत्वं कादाचित्कमित्येतद्दर्शयन्नाह, आकीर्णमिति। 'मण्डलं' चक्रवर्त्तिक्षेत्रं, 'सर्वं' निरवशेषं, 'आकीर्णं' व्याप्तं, 'मित्रैः', 'अरिभिः', 'एव च', भूम्यनन्तरभूम्येकान्तरतया तत्र मण्डले 'सर्वः' निरवशेषः, 'लोकः', 'स्वार्थपर एव'। तथा चोक्तं 'स नास्ति पुरुषो लोके यः श्रियं नाभिवाञ्छति। अशक्तिभयमानात्तु नरेन्द्रं पर्य्युपासते' इति ॥ एवञ्च कस्यचिदपि मित्रत्वं न विद्यते, एकार्थाभिनिवेशित्वादरित्वमेव सम्भाव्यमिति सर्वोऽपि लोकः स्वार्थपर एव। 'कुतो मध्यस्थता क्वचित्' क्वचिदपि कस्मात् माध्यस्थ्यं भवतीत्यर्थः ॥ ७१ ॥

एतदेव समर्थयन्नाह, भोगप्राप्तमिति। 'भोगप्राप्तं' भोगहेतुककोषसम्बद्धं, 'विकुर्वाणं' विकारं गच्छत्, 'मित्रमपि', 'उपपीडयेत्', 'अत्यन्तं विकृतं', चेत् 'हन्यात्', 'पापीयान्' निकृष्टतरः। स्पष्टमन्यत् ॥ ७२ ॥

हिताहितवर्त्तमानयोरेव मित्रामित्रस्वरूपत्वमित्याह, अमित्राण्यपीति। 'उपचयावहान्' हितकारिणो जनान्, 'अमित्राण्यपि', पूर्वं 'मित्राणि', कुर्वीत। शेषार्द्धं सुगमं ॥ ७३ ॥

एतदेव समर्थयन्नाह, बन्धुरपीति। 'बन्धुरपि' सोदर्य्योऽपि, †'अहिते युक्तः' अहितकारी, स 'शत्रुः', 'तं परिवर्जयेत्', स्पष्टं शेषार्द्धं ॥ ७४ ॥

---

* परकीयाश्चेति मु०।

† बन्धुरप्यहिते युक्तः शत्रुस्तं परिवर्जयेदिति टीकासम्मतः पाठः।

मित्रं दोषवदिति सूचितं तदेवात्र समर्थयति, मित्रमिति। 'बहुशः' वारं वारं, 'ज्ञातदोषं' सुविदितापराधं, 'विचार्य्य' निचाय्य, 'परित्यजेत्', नान्यथा। 'हि' यतः, 'अभूतदोषं' अकृतापराधं, 'त्यजन्', '*सः' विजिगीषुः, 'धर्म्मार्थौ', 'उपहन्ति', मित्रसाध्यस्वार्थस्तत्त्यागे स उपहन्यत एव ॥ ७५ ॥

विजिगीषोः स्वयमेव दोषगुणान्वेषित्वमाह, स्वयमिति। सुगमं ॥ ॥ ७६ ॥

व्यतिरेकमुखेनैतत् समर्थयति, न हीति। स्पष्टं ॥ ७७ ॥

मित्राणामनन्तरं कर्म्मभेदेन ज्यायोमध्यमकनीयसां स्वरूपमाह, मित्राणामिति। 'कर्म्माणि' उपकरणानि, ज्यायः कर्म्म उपकारलक्षणं यत् करोति तत् ज्यायोमित्रं। मध्यमं उपकारलक्षणं यत् करोति तत् मध्यमं मित्रं। कनीयः कर्म्म उपकारलक्षणं यत् करोति तत् कनीयो मित्रमित्यर्थः। श्लोकार्थः सुगमः ॥ ७८ ॥

मिथ्याभियोगकरणश्रवणे निषेधति, न हि मिथ्येति। स्पष्टं ॥ ७९ ॥

विजिगीषुणा मित्रारिविषये परप्रयुक्तानि वचनानि परीक्षणीयानि इति दर्शयन्नाह, प्रायोगिकमिति। 'प्रायोगिकं' भेदाद्युपायरूपप्रयोगभवं। यथा मुद्राराक्षसे चाणक्यचन्द्रगुप्तयोः कृतकृत्ययोर्भेदं कर्त्तुं राक्षसप्रयुक्तो वैतालिकः पठति—

> "भूषणाद्युपभोगेन प्रभुर्भवति न प्रभुः।
> परैरपरिभूतो यः स मन्यते त्वमिव प्रभुः" ॥ [मु०पृ०९७]

इत्यादि। 'मात्सरिकं' मत्सरभवं, यथा तत्रैव नेपथ्ये चाणक्योक्तिः, "आः क एष मयि स्थिते चन्द्रगुप्तमभिभवितुमिच्छति" इति। 'माध्यस्थ्यं' इच्छाद्वेषराहित्यं, यथा तत्रैव चाणक्यः, परवचनमाकर्ण्य "नूनं सुहृत्समः न ह्यनात्मसदृशेषु राक्षसः कलत्रं न्यासीकरिष्यतीति" [पृ०१४]।

---

* 'सः' इत्यस्य स्थाने 'हि' इति स० प० पठितं।

'प्रात्ययातिकं' पत्नपातेन युक्तं, यथा तत्रैव चरेण समर्पयता राक्षस-नामाङ्कितां अङ्गुरीयकमुद्रां अङ्गुल्यां निवेश्य चाणक्येन मनस्येवोक्तं "ननु राक्षस एवास्मदङ्गुलिप्रणयी संवृत्तः" [पृ०१५] इति। 'सोप-न्यासं' यस्मिन् वचसि स्थितस्य कार्य्यस्य उप समीपे न्यासः उपन्यासः तेन सह वर्त्तमानः सोपन्यासः। यथा तत्रैव चाणक्येन "भोः श्रेष्ठिन् स्वागतमिदमासनमास्यतां" इत्युक्ते चन्दनदासः प्रणम्य 'किं ण जाणादि अज्जो, जहा अनुचिदो उवआरो सहिअस्स परिहवादो वि महन्तं दुःखमुप्पादेदि, ता इहज्जेव अहं उचिदाए भूमीए उवविसामि' इति। चाणक्यः "भोः श्रेष्ठिन् मा मैवं उचितमेतदस्मद्विधैः सह भवतस्तदुपविश्यतामासन एव। चन्दनदासः स्वगतं उवलक्खिदमणेण किम्पि" इत्येवंविध उपक्षेप उपन्यास उच्यते [पृ०२३]। '*सानुशयं', अनुशयः पश्चात्तापः तेन सह वर्त्तमानः तं। यथा तत्रैव राक्षसः शस्त्रमाकृष्य ससम्भ्रमं, "मयि स्थिते कः कुसुमपुरमवरो-त्स्यति। प्रवीरक प्रवीरक क्षिप्रमिदानीं—

प्राकारान् परितः शरासनधरैः क्षिप्रं परिक्षिप्यतां,
द्वारेषु द्विरदैः परद्विपघटाभेदक्षमैः स्थीयतां।
मुक्त्वा मृत्युभयं प्रहर्त्तुमनसः शत्रोर्बले दुर्बले,
ते निर्य्यान्तु मया सहैकमनसो येषामभीष्टं यशः॥

विराधः, अमात्यालमावेगेन, वृत्तमिदं वर्ण्यते। राक्षसः सलज्जं "कथं वृत्तमिदं मया पुनर्ज्ञातं स एव कालो वर्त्तते" इति [पृ०४१।४२।] एतत् सर्व्वं सानुशयं वचः 'जानीयात्', ॥ ८० ॥

विजिगीषोर्मित्रविषये वृत्तमभिधातुमाह, प्रकाशेति। 'स्वयं', वि-जिगीषुः, 'सुहृदां' मित्राणां, 'प्रकाशपक्षग्रहणं' स्पष्टतः एकपक्ष-पातं, 'न कुर्य्यात्', परन्तु 'एषां', मित्राणां, अन्योन्यमत्सरं', अहमेव

---

* संशयितमिति स०।

विजिगीषोर्मत इति परस्परमत्सरं, 'आशु' शीघ्रं, 'धारयेत्', स्पष्टं ॥ ॥ ८१ ॥

मित्रविशेषे वृत्तमभिधातुमाह, कार्य्यस्येति। 'कार्य्यस्य' पृथिवी-पालनादेः, 'गरीयस्त्वात्' गुरुतरत्वात्, 'नीचानां' मित्रविशेषाणां, 'अपि', 'कालवित्' मित्रसाध्यकार्य्यकालज्ञः, 'सतोऽपि' विद्यमाना-नपि, 'दोषान्', 'प्रच्छाद्य' संगोप्य, 'असतः' अविद्यमानान्, 'गुणान्', 'वदेत्', ॥ ८२ ॥

बहुमित्रप्रशंसामभिधातुमाह, प्राय इति। 'प्रायः' बाहुल्येन, 'मित्राणि', 'सर्व्वावस्थानि' उत्तमाधममध्यमानि, म्लेच्छाटविकपुलि-न्दयतिप्रभृतीनि, 'भूपतिः' विजिगीषुः, 'कुर्व्वीत', 'हि' यतः, 'बहु-मित्रः' मित्रबाहुल्यवान्, 'रिपून्' शत्रून्, 'वशे स्थापयितुम्' वशी-कर्त्तुं, 'शक्नोति' समर्थो भवति, नान्यथेत्यर्थः ॥ ८३ ॥

मित्रप्रशंसामाह, न तत्रेति। स्पष्टं ॥ ८४ ॥

मण्डलवृत्तमभिधातुमाह, अमित्राणीति। 'अमित्राणि', 'अवतः' पालयितुन्, 'दृढव्रतैः' अचलैः, 'मित्रैः' 'न गृह्णीयात्', शेषः सुगमः ॥ ॥ ८५ ॥

मण्डलं तच्छोधनञ्चाभिधातुमाह, मित्रेति। स्पष्टं ॥ ८६ ॥

विशुद्धमण्डलस्य राज्ञः प्रजाह्लादकत्वं साधुराजत्वमुपसंहरन्नाह, इतीति। सुप्रतीतं ॥ ८७ ॥

इति कामन्दकीयनीतिसारटीकायामुपाध्यायनिरपेक्षानुसारिण्यां मण्डलयोनिर्नामाष्टमः सर्गः ॥ * ॥

अथ नवमः सर्गः।

विशुद्धमण्डले षाड्गुण्यप्रयोगयोग्ये विजिगीषौ पूर्व्वपठितसन्धिप्रयोगं दर्शयन् सन्धिकार्य्यस्यावस्थामेव तावदाह, *बलवद्विगृहीत इति। 'बलवद्विगृहीतः' शक्तित्रयसम्पन्नशत्र्वभियुक्तः। 'अनन्यप्रतिक्रियः' दुर्गमित्रादिप्रतिक्रियारहितः, नितरां क्षीयमान इत्यर्थः। सुतरां 'आपन्नः' सङ्कटापन्नः, 'कालयापनं कुर्व्वाणः', अर्थात् वाङ्मात्रेण केवलं, 'सन्धिमन्विच्छेत्', न तु कर्म्मणा सहसैव। एवं कृते कदाचित् अभियोक्तुः व्यसने समुपस्थिते विग्रहावसरो घटेतेत्यभिप्रायः॥ ॥१॥

षोडशविधसन्धिं श्लोकत्रयेणोपदेष्टुमाह, कपाल इति। अदृष्टनर इति, स्कन्धोपनेय इति। सुप्रतीतं॥ २॥ ३॥ ४॥

कपालोपहारसन्धिद्वयलक्षणमभिधातुमाह, कपालेति। 'समसन्धितः', घटकपालयोरिव विश्लिष्टयोररिविजिगीष्वोः शक्तिसाम्ये कोशदण्डाद्युपनतिं विनैव यः सन्धिः स समसन्धिस्तस्मात्, 'केवलं' नान्यथा इत्यर्थः। 'कपालसन्धिः', यथा कपालभङ्गप्रदेशे द्वितीयकपाले श्लेषिते बहिरभिन्न एव घटो दृश्यते न च निरन्तरसंश्लेषः, यथा सत्यशपथादिसन्धिकर्म्मरहितत्वात् वाङ्मात्रेण यः सन्धिः क्रियते कपालसन्धिरुच्यते यथेष्टं, व्यभिचारादित्यर्थः। तथा 'सम्प्रदानात्' कोशदण्डादीनां सम्प्रदानेन 'यः' सन्धिः, क्रियते, 'स उपहारः' तन्नामकः सन्धिः, 'उच्यते', ॥ ५॥

सन्तानसङ्गतनामकसन्धिद्वयलक्षणमभिधातुमाह, सन्तानेति। 'दारिकादानपूर्व्वकः' कन्यासम्प्रदानकृतो यः सन्धिः, सः 'सन्तानसन्धिः', 'विज्ञेयः', 'मैत्रीपूर्व्वः' मित्रताव्यवस्थापनपूर्व्वकः सन्धिः, 'सङ्गतसन्धिः'। स्पष्टमन्यत्॥ ६॥

---

* बलीयसाऽभियुक्तस्त्विति मु०।

सङ्कतसन्धेः केनाऽपि कारणेन अभेद्यत्वात् काञ्चनसन्धित्वमपरसम्मत-मिति श्लोकद्वयेनाह, यावदिति। संगत इति। 'यावदायुःप्रमाणः', अरिविजिगीष्वोः आयुषः प्रमाणं यावदस्यावस्थानमित्यर्थः। 'समा-नार्थप्रयोजनः' तयोर्द्वयोरपि अर्थः समानः प्रयोजनानि च समा-नानि भवन्ति। अर्थविषये कोऽपि त्वदीयो मदीय एव, मदीयस्त्वदीय एवेति विभक्तिर्नास्ति, प्रयोजनविषये तु धर्म्मार्थकामविषयाणि प्रयो-जनानि उभयोः समानानि न तत्र विभक्तिः काचिदस्तीत्यर्थः। 'सुवर्णवत् *प्रकृष्टत्वात्',। स्पष्टमन्यत्॥ ७॥ ८॥

उपन्याससन्धिलक्षणमाह, भव्यामिति। 'भव्यां' शुभां, 'एकार्थ-संसिद्धिं' एकस्य भूम्याद्यर्थस्य या सिद्धिः तां 'समुद्दिश्य' लक्षीकृत्य, 'उपन्यासकुशलैः', उपन्यासचातुरीविद्भिः, त्वं गत्वा तां भूमिं गृहाण अहमपि गत्वा तामेव भूमिं ग्रहीष्यामीति उपन्यासपूर्व्वकं, 'यः' सन्धिः, 'क्रियते', 'सः' 'उपन्याससन्धिः', 'उदाहृतः', ॥ ९॥

प्रतीकारसन्धिलक्षणमाह, मयेति। स्पष्टं॥ १०॥

श्लोकान्तरेण तदेवाह, उपकारमिति। स्पष्टं॥ ११॥

संयोगसन्धिलक्षणमाह, एकार्थामिति। 'एकार्थां' एक एवार्थः प्रयोजनं यत्र तां, तुल्यप्रयोजनामित्यर्थः। '†यात्रां' 'सम्यगुद्दिश्य' सुचारुरूपेणाभिलक्ष्य, 'यत्र' सन्धौ, 'अभिगच्छतः' उद्यच्छतः, अरि-विजिगीषू इत्यर्थः। 'स तु सन्धिः', 'संहितप्रयाणः' परमविश्वास-युक्तः, 'संयोगः' तन्नामा, 'सन्धिः', उच्यते॥ १२॥

पुरुषान्तरसन्धिलक्षणमाह, आवयोरिति। 'यस्मिन्' सन्धौ, दण्ड-भयोपनतारिसमीपे एवं 'पणः' प्रतिज्ञा, 'प्रक्रियते', विजिगीषुणे-त्यर्थः,यत् 'आवयोः', 'योधमुख्याभ्यां, प्रधानयोद्धृपुरुषाभ्यां संहिताभ्यां '‡सदर्थः' भूमिलाभादिः, 'साध्यः', इति 'स सन्धिः', 'पुरुषान्तरः' तन्नामक उच्यते॥ १३॥

---

* प्रकृष्टत्वादिति मु०। † क्रियामिति मु०। ‡ मदर्थ इति म०।

अदृष्टनरसन्धिस्वरूपमभिधातुमाह, त्वयैकेनेति। 'अदृष्टपुरुषः', विजिगीषोः कश्चन पुरुषो न दृश्यते यत्र स इति। अन्यत्सर्व्वं सुप्रतीतं ॥ १४ ॥

आदिष्टसन्धिलक्षणमभिधातुमाह, यत्रेति। 'यत्र' सन्धौ, 'ऊर्जितः' प्रबलः, 'रिपुः', 'भूम्येकदेशेन पणेन' भूम्येकदेशदानप्रतिज्ञया, 'सन्धीयते', सः 'सन्धिविद्भिः' सन्धिधर्म्मविशारदैः, 'आदिष्टः' तन्नामकः सन्धिः, 'उच्यते', ॥ १५ ॥

आत्मामिषसन्धिस्वरूपमभिधातुमाह, स्वसैन्येन त्विति। 'स्वसैन्येन' स्वहितेन सैन्येन, यत् 'सन्धानं', सः 'आत्मामिषः' तदाख्यया प्रसिद्धः सन्धिः, 'स्मृतः', यतः 'प्राणरक्षार्थं सर्व्वदानादुपग्रहः क्रियते', सकलभूहिरण्यादिदानेनाप्यात्मरक्षार्थमुचितमुपग्रहीतुमित्यर्थः ॥ १६ ॥

परिक्रयसन्धिलक्षणमभिधातुमाह, कोषांशेनेति। 'कोषांशेन' कोषस्य तृतीयचतुर्थभागेन, 'कुप्येन' सुवर्णरजतभिन्नेन, उक्तलक्षणेन 'सर्व्वकोषेण वा' अथवा कोषसाकल्येन, 'शेषप्रकृतिरक्षार्थं' कोषवर्ज्यावशिष्टप्रकृतिसंरक्षणाय, यः क्रियते सः 'परिक्रयः' तन्नामकः, सन्धिः 'उदाहृतः', ॥ १७ ॥

उच्छिन्नपरदूषणाख्यसन्धिद्वयलक्षणमाह, भुवामिति। * भूमिदानमुच्छेदहेतुः इत्यर्थः। 'सर्व्वभूम्युत्थितफलादानेन', 'परदूषणः' तवैतत्सर्व्वं फलं न भवति त्वया परोपद्रवः कृत इति परोऽत्र दूष्यते इति तदाख्यः सन्धिः ॥ १८ ॥

स्कन्धोपनेयसन्धिलक्षणमाह, परिच्छिन्नमिति। 'परिच्छिन्नं' इयत्तया कृतसङ्ख्यं, 'फलं' हिरण्यादि, 'यत्र' सन्धौ, '†स्कन्धस्कन्धेन

---

* परिभूषणः इति मु० का०। परदूषणस्तु टीकासम्मतः पाठः। परभूषणः इति शब्दक०।

† स्कन्धः स्कन्धेनेति मु०। प्रतिस्कन्धेनेति शब्दक०।

दीयते', इयता कालेन एतावत्सङ्ख्यकं फलं देयमिति निबन्धेन व्यवस्थीयते, 'तं', 'स्कन्धोपनेयं' तदाख्यं, 'सन्धिं', तज्ज्ञा वदन्तीत्यर्थः ॥ १९ ॥

सम्भवतः सन्धिविशेषानभिधाय, सुश्लिष्टसन्धिलक्षणं येषां तानभिधातुमाह, परस्परोपकारश्चेति । 'परस्परोपकारः', रामसुग्रीवयोरिव यः सन्धिः । 'मैत्रः' मित्रत्वेनैव निरुपचरितेन यो भवति । 'सम्बन्धजः' दारिकादानपूर्व्वकः, 'उपहारः' यत्र कोषाद्याक्रियते । स्पष्टं शिष्टं ॥ २० ॥

एकस्यैवोपहारस्य प्रकृतसन्धित्वमस्मत्सम्मतमित्याह, एक एवेति । 'मैत्रवर्जिताः सर्व्वेऽन्ये', त्रयः सन्धयः, 'उपहारस्य भेदाः' उपहारसन्ध्यन्तर्गता एव । स्पष्टमन्यत् ॥ २१ ॥

एतदेवोपपादयति । अभियोक्तेति । 'अभियोक्ता' विजिगीषुः, 'बली' शक्त्यादिसम्पूर्णः, 'यस्मादलब्ध्वा न निवर्त्तते', तेन प्रार्थितमुपहरणीयमेव, तस्मादित्यादि सुगमं ॥ २२ ॥

असन्धेयमभिधातुं श्लोकपञ्चकेनाह, वाल इति । विरक्तेति । दैवेति । अदेशस्थ इति । *एतैरिति । श्लोकानामर्थः सुबोधः ॥ २३ ॥ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

अनन्तरोक्तविंशतिसंख्यकानां पुरुषाणां एकैकशोऽसन्धेयत्वमभिधातुमादौ बालस्य तावदसन्धेयत्वे हेतुमाह, बालस्येति । स्पष्टं ॥ २८ ॥

वृद्धचिररोगिणोरसन्धेयत्वे कारणमाह, उत्साहेति । 'उत्साहशक्तिहीनत्वात्' उत्साहोऽत्रोद्योगस्तच्छक्तिहीनत्वात्, 'वृद्धः', विग्रहासमर्थ इत्यर्थः । 'तथा' एवं, 'दीर्घामयः', दीर्घव्याधिपीडितः, 'एतौ द्वौ', 'अपि', 'स्वैः' ज्ञातिभिः, 'एव', 'परिभूयेते', 'असंशयं', ॥ २९ ॥

---

* एतस्य श्लोकस्य चतुर्थपादे 'ध्रुवं यान्त्यचिरादृशं' इति टीकासम्मतः पाठः ॥

सर्व्वज्ञातिबहिष्कृतस्यासन्धेयत्वमाह, सुखोच्छेद इति। स्पष्टं ॥ ॥ ३० ॥

भीरुभीरुकजनयोरसन्धेयत्वे कारणमाह, *भीरुरिति। श्लोकार्थः सुगमः ॥ ३१ ॥

लुब्धलुब्धानुजीविकयोरसन्धेयत्वं प्रतिपादयन्नाह, लुब्धस्येति। 'लुब्धस्य', 'असंविभागित्वात्' असम्यग्वृत्तिविधायित्वात्, 'अनुजीविनः' योद्धृपुरुषादयः, 'न युध्यन्ते', 'लुब्धानुजीवितैः', 'दानभिन्नैः' दानैर्वानायत्तैः, †'विहन्यते', विजिगीषुरित्यर्थः ॥ ३२ ॥

विरक्तप्रकृतिकविषयातिसक्तिमतोरसन्धेयत्वप्रतिपादनायाह, सन्त्यज्यत इति। पूर्व्वार्द्धं सुगमं। ‡'विषयेष्वतिसक्तिमान्' स्त्रीसम्भोगमद्यपानाद्यासक्तचित्तः। प्रतीतमन्यत् ॥ ३३ ॥

अनेकचित्तमन्त्रस्यानवस्थितचित्तत्वादसन्धेयत्वमाह, अनेकेति। स्पष्टं ॥ ३४ ॥

देवब्राह्मणनिन्दकदैवोपहतकयोरसन्धेयत्वमाह, §सदाऽधर्म्मेति। 'अधर्म्मबलीयस्त्वात्' देवब्राह्मणद्वयानिन्दाजनितपापप्रभावात्, 'सदा', ¶'विशीर्य्यते' विनश्यति, **'स्वयं ह्येव' विजिगीषुणाऽभियुक्तः किल। 'दैवोपहतकस्तथा' दैवोपहतकोऽपि, जन्मान्तराचरितपापादेव विनष्टो भवति ॥ ३५ ॥

दैवचिन्तकरूपदैवपरस्यासन्धेयत्वमाह, सम्पत्तेश्चेति। 'आत्मना न विचेष्टते', यथोपनतेऽपि भोजने दैवपरो विपद्यत एव तथेत्यर्थः ॥ ॥ ३६ ॥

---

* वीरोऽपि भीरुपुरुषैः संग्रामे हि प्रमुच्यते इति संगतिलभ्यः पाठः।

† निहन्यते इति मु०। ‡ विषयेष्वतीति मु०। § सदा धर्मेति मु०।

¶ विशीर्य्यत इति मु०। एतत् क्रियापदानुसारेण कर्त्तृपदमपि बहुवचनान्तं वर्त्तते किन्तूद्देश्यानुसारेण न तत् समीचीनमिति। ** स्वयं चैवेति मु०।